# *Some ontological concepts of* Kashmir Śaivism*: A revisit to Abhinavagupta's Gītārthasaṅ graha*

Partha Sarathi Sil
Assistant Professor
Department of Sanskrit
Tripura University
parthasarathisil@tripurauniv.ac.in
parijat14@gmail.com

Abstract:

The *Bhagavadgītā* has a unique place in Śaiva literature, because in the Śaiva tradition there is a belief that Śrī Kṛ ṣ ṇ a learnt the non-dual Śaiva *āgama*s from sage *Durvāsas* and the other *āgama*s from Upamanyu. The present study proposes an in-depth analysis of *Gītārthasaṅ graha* of Abhinavagupta highlighting the principles of Kashmir Śaivism ingrained in the *Bhagavadgītārthasaṅ graha*. It cannot be denied that among all the compositions of Abhinavagupta the Abhinavabhāratī, Tantrasāra, Tantrāloka, Locanaṭ ikā etc. are widely discussed by the scholars, while the Gītārthasaṅ graha comparatively lags behind. From the standpoint of investigative research, in this present paper we may find some ontological concepts of Kashmir Śaivism in Abhinavagupta's Gītārthasaṅ graha.

Keywords: Śaivism, *saṅ graha-śloka, Śaiva, sādhaka, tattva, māyā, tattva, ātman*, *prakṛ ti.*

Abhinavagupta is the famous *ācārya* (scholar) of the Kashmir Śaivism. He composed the Gītārthasaṅ graha. The Gītārthasaṅ graha does not discuss the thirty six *tattva*s of Kashmir Śaivism serially. But the *tattva*s of Kashmir Śaivism like *ātman*, *prakṛ ti*, *puruṣ a*, *svātantrya-śakti* (power of divine freedom) etc. have been mentioned and discussed according to the contexts. According to Kashmir Śaivism, all the creatures are *paśu*s. They are captivated by the *pāśa*; noose. Due to ignorance men their souls are perishable as their bodies are perished. This *ātman* is eternal. The concept of the *Trika* philosophy enunciated by Abhinavagupta and other *Śaiva Ācārya*s is primarily based on the three *tattva*s of *Parā* (transcendental), *Aparā* (Material) and *Parāparā* (a combination of transcendental and material). The three *tattva*s of Kashmir Śaivism called *Pati* (the supreme Lord), *Pāśa* (fetter) and *Paśu* (the fettered being) denote *Śiva,*

*Śakti* and *Aṇ u* respectively. *Ācārya* Kṣ emendra (11th Century C.E.) firmly established the foundation of the Kashmir Śaivism. It is, however, a fact that prior to these two *Ācārya*s there remained the tradition of Śaivism in Kashmir. The present research paper will discuss on the ancient *Ācārya*s together with their available compositions.

Now we are going to concentrate here on the principles of Kashmir *Śaiva* Philosophy presented in the *Gītārthasaṅ graha* of Abhinavagupta. Knowledge, the subject of knowledge and the knower all these are in principle the manifestation of the Parameśvara. *Prativimvavāda* or the theory of reflection reveals that itself. Keeping away from any reflection on '*ṣ aṭ ka*' as presented in this *Gītārthasaṅ graha* of Abhinavagupta if we look from the stand point of the theory we can easily find a little glimpse of the process of creation. The role of *māyā*[1] at the root of the creation is also very significant. Besides one who is ignorant about the *ātman* (self) thinks that *ātman* gets killed. In fact this kind of people is known to be *Baddhajīva* (bonded being).[2] This bonded being is according to Kashmir Saivism '*pāśabaddha*' and as such are looked upon as '*paśu*'. These bonded being gradually attains *Śivatva* (the highest reality) through revelation of the knowledge of self. This *atman* is the root cause of the whole universe and so by its own nature the self itself, it performs the activities of creation, sustenance and dissolution. And all the verities of this created world happen due to these. From the stand point of theory all this is the manifestation of the natural existence of the *Parameśvara*[3]. The yogic enlightenment has been referred to in the *Bhagavadgītā* as a way of emancipation bondage of action.[4] The first creation of transformation of the illusive power or the *māyāśakṭ i*[5] of which spoils or distorts the conception of infinity or indivisibility. This element of *māyā* is the greatest instrumental power in the activity of the creation of the universal self. Abhinavagupta in the commentary of the second chapter of the *Gītā* has pointed out two forms of *māyā*[6]. One of them hypnotizes while the other reveals possibilities of happiness or pleasure before us. Common people concentrate

---

[1]माया च नाम देवस्य शक्तिरव्यतिरेकिणी।
भेदावभासस्वातन्त्र्यं तथा हि स तया कृतः॥ Tantrāloka, 9/141-150.

[2]य एनमात्मानं देहं च हन्तारं हतं च चेति, तस्य अज्ञानम्, अत एव स बद्धः।Gītārthasaṅ graha, 2/20.

[3]किं च यत्तन्मूलकारणं किंचिदभिमतं तदेव यथाक्रमं विचित्रस्वभावतया स्वात्ममध्ये दर्शिततत्तदनन्तसृष्टिस्थितिसंहृतिवैचित्र्यं नित्यमेव,Gītārthasaṅ graha, 2/30.

[4]Gītārthasaṅ graha,2/40.

[5]या सर्वेषां भूतानां निशा, मोहिनी माया तस्यां मुनिर्जागर्ति। Gītārthasaṅ graha, 2/31.

[6]येयं माया खलु तस्या मोहकत्वं नामरूपे सुखतन्त्रताभासनं च। Gītārthasaṅ graha, 2/71.

their mind and intellect towards the hope of happiness pleasure while, to the contrary, the *yogin*s engage all their efforts to root out the hypnotic elements, effects or spirits of the *māyā*. They remain awake all along band stick to the resolve of not to getting attached or bonded by the hypnotic power of the *māyā* with a view to attaining the knowledge of the self[7]. With reference to the *māyā*, *Ācārya* Śaṅ kara also quotes from *Pañcadaśī* in his commentary on Gītā and describes the sustenance of the power *māyā* in *Brahman*[8]. Abhinavagupta has brought the context of captivated *jīva* in the description of Kṛ ṣ ṇ a's advice to make the matter realize. The *ātman*, which is considered as the main cause of the world, the origination, existence and destruction happen herein. In the *tattvik* perspective it is said as the normal existence of Parameśvara[9]. So, the Bhagavadgītā has advice not to be sorry for *ātman*, which is imperishable. In the second chapter it is advised to avoid the bondage of activity.[10] *Jīva* is *paśu*. Captivity is the main cause of *pasuttva*, animality. Parameśvara pervades this mundane existence by *māyā*. *Māyā* hints at pleasure. A real yogin always remains cautious to be freed from the influence of *māyā*[11]. For the main target is attainment of *Brahman*[12]. Infatuated person may not perform works by his sense organs of action, but he cannot avoid the resolved and iresolved activities of mind[13]. Abhinavagupta has said about the inseparable relation between *jñāna* and *karman*[14]. The work done by the sense organs of action has no relation or attachment with the yogins[15]. The yogin performs the sacrifice of his sense organs by the fire of his self control, Mind is controlled. Fire

---

[7]अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा, बृहदारण्यकोपनिषद्, 4/5/14

परमात्मनो नास्ति कश्चिद्विनाशोऽपरिणामधर्मत्वात्, Gītārthasaṅ graha, *GS, 2/17.*

[8] मृच्छक्तिवद्ब्रह्मशक्तिरनेकाननृतान् सृजेत्।
यद्वा जीवगता निद्रा स्वप्नश्चात्र निदर्शनम्॥
निद्राशक्तिर्यथा जीवे दुर्घटस्वप्नकारिणी ।
ब्रह्मण्येषा तथा माया सृष्टिस्थित्यन्तकारिणी॥ Pañcadaśī, 58-64,Bhagavadgītāvyākhyā, *2/69.*

[9]एतदेव स्फुटयति नायं भूत्वा इति । अयमात्मा न न भूत्वा भविता, अपितु भूत्वैव । अतो न जायते । न च म्रियते यतो भूत्वा न न भविता, अपितु भवितैव। Gītārthasaṅ graha, 2/21.

[10]एषैव च यथा योगे कर्मकौशले योज्यते तथैव शृणु । यया बुद्ध्या कर्मणां बन्धनं त्यक्ष्यसि । Gītārthasaṅ graha, 2/40.

[11]योगी तु तद्विपरीतस्तदीयं मोहकत्वं तदुन्मूलनाय पश्यति, सुखतन्त्रतां तु नाद्रियते । Gītārthasaṅ graha, 2/31.

[12]स च योगी सर्वकामसंन्यासित्वात् शान्तिरूपं मोक्षमेति। Gītārthasaṅ graha, 2/73.

[13]कर्मेन्द्रियशेन्न करोति अवश्यं तर्हि मनसा करोति । प्रत्युत मूढाचारः मानसानां कर्मणामत्यन्तमपरिहार्यत्वात्त्। Gītārthasaṅ graha, 3/6.

[14]Gītārthasaṅ graha, 3/15.

[15]शरीरोपयोगी इन्द्रियव्यापारात्मकं कर्म शरीरं, यन्मनोबुद्धिभ्यां न तथानुरञ्जितम्। Gītārthasaṅ graha, 4/21.

remains there burning. There the desires are always burnt by the fire produced by the thought of existent soul. It becomes possible by the penance also[16]. Then it is named sacrifice of penance, Abhinavagupta has quoted from the Spandakārikā to say that *Prabhu*, the Lord is the experient and this mundane existence is worthy to be experienced. Everything is included in the Parameśvara *tattva*[17]. The yogin illuminates the fire of knowledge with the help of penance, prohibits the mind with the help of intellect decides the single matter (*Parameśvara)*, and burns other matters. In the text *Śivopanisad* the worshiping of the yogin by the yoga of the soul is prescribed and it has been discussed contextually by Abhinavagupta in the Gītārthasaṅ graha[18]. The nature of god is ātman. The Gītā has clearly mentioned the *ātman* as the entity of god[19]. In the recapitulating ślokas of the fourth chapter Abhinavagupta has mentioned about the activities of the sense organs, which may be considered as belonging to the *Śiva* tattva[20]. The yogins perform activities without any attachment to the sense organs and there remains no doubt about the fruit of action[21]. They attain *naiṣ ṭ hiki* (immortality)[22]. To illustrate the nature of *ātman*, Abhinavagupta has chosen a very beautiful simile. He said, as a hole in a room does not make any influence to the resident of that room, likewise the *ātman* resides like the in this body where there are nine holes[23]. Ignorance is destroyed by knowledge and the self manifestation knowledge is fulfilled[24]. Parabrahman is of the nature of knowledge. The entity of Brahman

[16]प्रतिपन्नभावनारूपा अभिलाषप्लोषका विस्फुलिङ्गाः, तेषु इन्द्रियाण्यर्पयन्ति। अत एव ते तपोयज्ञाः। Gītārthasaṅ graha, 4/26.

[17]"न भोग्यं व्यतिरिक्तं हि भोक्तुस्त्वत्तो विभाव्यते ।
एष एव हि भोगो यत्तादात्म्य भोक्तृभोग्ययोः॥"
इति स्पन्देऽपि- 'भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः' इति (स्प, २ नि, ४)।

[18]तदुक्तं शिवोपनिषदि 'भावेऽत्यक्ते निरुद्धा चिन्नैव भावान्तरं व्रजेत्।
तदा तन्मयभावेन विकसत्यति भावना॥ V.B. 56, Gītārthasaṅ graha, 4/27.

[19]आत्मन ईश्वरस्य साम्ये कोऽपि विशेष उक्तः। Gītārthasaṅ graha, 4/35.

[20]विधत्ते कर्म यत्किंचिदक्षेच्छामात्रपूर्वकम्।
तेनैव शुभभाज स्युस्तृप्ताः करणदेवताः॥ Gītārthasaṅ graha, Saṅ grahaśloka-4.

[21]योगिनश्च केवलैः सङ्गरहितैः परस्परानपेक्षिभिश्च कायादिभिः कुर्वन्ति कर्माणि सङ्गाभावात्॥ Gītārthasaṅ graha, 5/11.

[22]नैष्ठिकीम् अपुरावर्तिनीम्, Gītārthasaṅ graha, 5/12.

[23]यथा वेश्मान्तर्गतस्य पुंसो न गृहगतैर्जीर्णत्वादिभिर्योगः एवं मम चक्षुरादिच्छिद्रगवाक्षनवकालङ्कृतदेहगेहगतस्य न तद्धर्मयोगः, Gītārthasaṅ graha, 5/13.

[24]ज्ञानेन तु अज्ञाने नाशिते ज्ञानस्य स्वप्रकाशत्वं स्वतः सिद्धम्, Gītārthasaṅ graha, 5/16.

never perishes[25]. Brahman is settled on equality[26]. The importance of *ātman* in respect of emancipation is immense. Pāramātman is widely pervasive. If the yogin cannot perceive the Paramātman as pervasive one, he is unable to realize the true nature of Him. The Paramātman does not express His nature always. But everything is dissolved in the manifestation of Paramātman[27]. However, the mind is the indispensable *tattva* for emancipation of *ātman*, because it is the mind which can emancipate *ātman*[28]. In this way union of *mānas-tattva* and *ātmatattva* is observed in the *Gītārthasaṅ graha*. In course of discussion of mind there comes the context of *buddhi-tattva* (intellectual faculty)[29]. The yogin attains accomplishment by concentration of mind by ātman. The mind becomes steady by practice and devotee gradually controls his sense organs[30]. By setting the look on the top of the nose as the look remains concentrated at one spot only leaving aside all other things, similarly it is the prime object of worship is to settle the mind of Brahman[31]. The path of emancipation is the connection of enunciated mind with this mundane existence filled with sorrow. Here practice is the important thing[32]. Desire should be forsaken by mind and leaving of activities[33] is not desirable. This mind destroys the direct fruit of attainment of the entity of Brahman and also the fruit of liberation of incorporeal[34]. In respect accomplishment of yoga of the yogin by controlling mind, Abhinavagupta has cited example from the yogaśastra which is available in *Gītārthasaṅ graha*[35].

---

[25]तेषां सर्वतः सर्वास्ववस्थासु ब्रह्मसत्ता पारमार्थिकी न निरोधकालमपेक्षते। Gītārthasaṅ graha, 5/26.

[26]साम्ये हि ते प्रतिष्ठिताः । साम्यं च ब्रह्म। Gītārthasaṅ graha, 6/10.

[27]यच्चेदं वस्तुजातं तद्भासनात्मनि परमात्मनि विनिविष्टं भवति, तथाविधं यो न पश्यति स परमार्थस्वरूपात् प्रनष्टः तद्व्यतिरेके सत्यनिर्भासात्। Gītārthasaṅ graha, 6/31.

[28]मनसैव न व्यापारोपरमेन। Gītārthasaṅ graha, 6/26.

[29]आत्मानं चित्तं च युञ्जीत एकाग्रीकुर्यात् । Gītārthasaṅ graha, 6/11.

[30]आसनस्थैर्याकालस्थैर्ये चित्तस्थैर्यम् । चित्तक्रियाः संकल्पात्मानः अन्याश्चेन्द्रियक्रिया तेन यताः नियमं नीताः। Gītārthasaṅ graha, 6/13.

[31]नासाग्रस्यावलोकने दिशामनवलोकान्। मत्परा युक्त आसीत्येत्यर्थः। Gītārthasaṅ graha, 6/15.

[32]स तु निश्चयेन आस्तिकता जनितया श्रद्धया सर्वथा योक्तव्यः अभ्यसनीयः। अनिर्विणम् उभयप्राप्तौ दृढतरं संसारं दुःखबहुलं प्रनिर्विणं वा चेतो यस्य। Gītārthasaṅ graha, 6/24.

[33]मनसैव न व्यापारोपरमेन । Gītārthasaṅ graha, 6/25.

[34]भगवदभिहितानन्तरोपायपरम्परया स्फुटमपि प्रत्यक्षनिर्द्दिष्टमपि ब्रह्म, मनसश्चाञ्चल्यदौरात्म्यात्सुदूरे वर्तते इति परोक्षायमाणम्। Gītārthasaṅ graha, 6/35.

[35]अभ्यासेन मोक्षपक्षः क्रमात्क्रमं विषयीक्रियते इति द्वयोरुपादानम्। उक्तं च तत्र भवता भाष्यकृता 'उभयाधीनश्चित्तवृत्तिनिरोधः' (Y.D. 1/12), Gītārthasaṅ graha, 6/36.

As per the doctrine of the Śaivism *jñāna* and *vijñāna* mean *jñāna* and *kriyā*[36]. By knowing these two things everything can be known. The Gītārthasaṅ graha establishes non dualism in the *prakṛ tivāda*[37]. The *Gītārthasaṅ graha* mentions eight divisions of a single *prakṛ ti*[38]. The *Prakṛ ti* is the cause having no beginning as it has no other cause. The *tattva* of god is not different from the *tattva* of *prakṛ ti* and *puruṣ a*[39]. All the *prakṛ ti* and other *tattva*s are absorbed in the *tattva* of god. The prowess is the power or force of man. This world is created by the will power of *Parameśvara*[40]. Manifestation of will force is inherent in His desire. By the power of god the noose of infatuation destroys and the *yogin* becomes powerful by the power of god[41]. *Vāsudeva* is beyond the *guṇ a*s. He exists everywhere. The yogin who processes the knowledge of *Vāsudeva*'s pervasiveness, is great[42]. *Parameśvara* makes everyone to play. He performs all the plays of this world by his power. *Māyā*, universal manifestation is his play[43]. It is due to *māyā tattva* that the qualities like *sattva* etc. though not different from supreme consciousness, appear separately. Due to the influence of *māyā* men become ignorant primarily[44]. God is Brahman for His boundless expansion. His nature is consciousness. The universal creative power remains inherent in Him. God manifests the external material by the power of His divine freedom which is His divine glory (*aiśarya*). The expressive entity which remains in the outer matters is called *visarga* (throwing out)[45]. This *visarga* makes the manifestation of the experient like *Brahman* etc. and the variety of living and non-living things of the world. The *puruṣ a tattva*

---

[36]ज्ञानविज्ञाने ज्ञानक्रिये एव ।ततो न किंचिदवशिष्यते सर्वस्य ज्ञेयस्य ज्ञानक्रियानिष्ठत्वात्। Gītārthasaṅ graha, 7/2.

[37]प्रकृतिरप्यनादिः कारनान्तराभावात्। Gītārthasaṅ graha, 13/20.

[38]सा चैकैव सती प्रकाराष्टकेन भिद्यते इति एकप्रकृत्यारब्धत्वादेकमेव विश्वमिति प्रकृतिवादेऽप्यद्वैतवादं प्रदर्शितम्। Gītārthasaṅ graha, 3/5.

[39]पौरुषं येन तेजसा पुरुषोऽहमिति सार्वभौमं प्रतिपद्यते। Gītārthasaṅ graha, 7/8.

[40]इच्छा हि सर्वत्र भगवच्छक्ति तयानुयायिनी न क्वचिद्विरुष्यते, Gītārthasaṅ graha, 7/11.

[41]ये तु विनष्टतामसाः पुण्यापुण्यपरिक्षयक्षेमीकृतात्मानस्ते विपरीतमहामोहवितानाः सर्वमेव भगवद्रश्मिखचितं जरामरणमयतमिस्रस्रुतं ब्रह्म विदन्ति। Gītārthasaṅ graha, 7/29.

[42]अनेनैव चाशयेन वक्ष्यते 'वासुदेवः सर्वमिति' इति ज्ञानेन … इति बुद्ध्या स महात्मा स च दुर्लभ इति। Gītārthasaṅ graha, 7/13.

[43]देवः क्रीडाकरः, तत्र भवा दैवी क्रीडा ममेयमित्यर्थः। Gītārthasaṅ graha, 7/14.

[44]ये च मां सत्यप्यधिकारिणी काये नाद्रियन्ते ते दुष्कृतिनो नराधमा मूढा आसुरतामसाः । इति मायामहिमैवायम्। Gītārthasaṅ graha, 7/15.

[45]तस्य च चैतन्यस्वभावस्य ब्रह्मणोऽपरिच्छिन्नबाह्यलक्षणतया क्रोडीकृतविश्वशक्तेरैश्वर्यलक्षणात्स्वातन्त्र्यात् …. यो विसर्गक्रमेण… निर्भासकः, Gītārthasaṅ graha, 7/6.

(empirical self) is the *ātman* where all the individual souls reside[46]. The doors of the body are all *tattvas* of sense organs[47]. The centre of all the *tattva*s is *Śiva-tattva* which remains on the head of all *tattva*s[48]. Attainment of the *Śiva-tattva* for a single moment produces the knowledge of non-separation. In support of this Abhinavagupta has produced reasoning from the *Stavacintāmaṇ i* in his *Gītārthasaṅ graha[49]*. Attainment of the *Śiva-tattva* destroys the cycle of rebirth[50]. The paśu, enchained by noose, *pāśa* revolve round the cycle of birth and death in his world[51]. Ācārya Abhinavagupta has given appropriate description of Parameśvara tattva in the recapitulating śloka of the eighth chapter[52]. Knowledge is but attachment with god[53]. A devotee acquires appropriate knowledge by knowing the pure experient, impure object to be known and pure and impure proof[54]. All these things unfold the constituent element of Śaivism. The mind of the devotee remains devoid by resolve and thought construct in the knowledge of *tattva*[55]. In the thirteenth chapter of Gītārthasaṅ graha unexposed *prakṛ ti* and eleven sense organs have been discussed[56]. *Rūpa* etc. five matters are also described there. These are discussed in the Kashmir Śaivism as *tattva*s. Abhinavagupta has said that consciousness is *puruṣ a*[57]; paramātman is of the nature of great joy and bears no name[58]. His power of manifestation is Supreme Brahman. The

---

[46]पुरुषः आत्मा स चाधिदैवतम्, तत्र सर्वदेवतानां परिनिष्ठततत्त्वात्। Gītārthasaṅ graha, 8/4.

[47]द्वाराणि इन्द्रियाणि । हृदि इत्यनेन विषयसंगाभाव उच्यते न तु विष्ठास्थानाधिष्ठानम्। Gītārthasaṅ graha, 8/12.

[48]आत्मनः प्राणम् आत्मसारथिम् इच्छाशक्त्यात्मनि मूर्ध्नि सकलतत्त्वातीते धारयन्तिति कायनियमः। Gītārthasaṅ graha, 8/12.

[49]यदाहुराचार्यवर्याः 'निमेषमपि यद्येकं क्षीणदोषे करिष्यसि।
पदं चित्ते तदा शंभो किं न संपादयिष्यसि॥ (Sta.Ci.114), Gītārthasaṅ graha, 8/14.

[50]अन्यतस्तु सर्वत्र एव पुनरावृत्तिरस्तीति समन्तरेण श्लोकेन प्रतिपादयिष्यते । मां तु प्राप्य न पुनर्योगिनो जन्मादित्रासमाप्नुवन्ति। Gītārthasaṅ graha, 8/15.

[51]एवं सृष्टौ प्रलये च पुनः पुनर्भावः । नान्येऽन्ये उपसृज्यन्ते अपितु ते जीवाः। Gītārthasaṅ graha, 8/19.

[52]सर्वतत्त्वगतत्वेन विज्ञाते परमेश्वरे।
अन्तर्बहिर्न सावस्था न यस्यां भासते विभुः॥ Gītārthasaṅ graha, Saṅ grahaśloka-8.

[53]ज्ञानम् आवेशात्म, अभ्यासाच्छ्रेयः अभ्यासस्य तत्फलात्। Gītārthasaṅ graha, 12/12.

[54]शुद्धाशुद्धविमिश्रोत्थसंविदैक्यविमर्शनात्।
भूर्भूवः स्वस्त्रयं पश्यन्समत्वेन समो मुनिः॥ Gītārthasaṅ graha, Saṅ grahaśloka-11.

[55]सततं योगी व्यवहारवस्थायामपि प्रशान्तान्तःकरणात्। Gītārthasaṅ graha, 12/14.

[56]अव्यक्तं प्रकृतिः। इन्द्रियाणि मनसा सहैकादश। इन्द्रियगोचराः रूपादयः पञ्च। Gītārthasaṅ graha, 13/6.

[57]चेतना दृक्शक्तिः पुरुषः।Gītārthasaṅ graha, 13/7.

[58]परमानन्दरुपस्य महद्ब्रह्म बृहकात्मीयशक्तिरूपं ब्रह्म। Gītārthasaṅ graha, 14/3.

Supreme Brahman is indicated by the three words- *om, tat* and *sat*[59]. By the word om, showered on *tat*[60], the willful power of divine freedom is indicated in respect of emergence of the world after the state of tranquility. *Maheśvara* is the Supreme soul. There is no other *tattva* excepting him, this knowledge, indicative of union, is yoga[61]. A real yogin performs the practice of this yoga. Prakṛ ti is the cause, five great elements and *śabda* (sound) etc. render assistance in the creation of effect and *puruṣ a* is the Supreme and experient[62]. Abhinavagupta has, in connection with the *prakṛ ti-puriṣ a tattva,* resorted to simile of lame and blind persons in the *Gītārthasaṅ graha.* There the soul is secondary observer[63]. In the discussion of the prakṛ ti and puruṣ a tattva Abhinavagupta has spoken about sāṅ khya and yoga philosophy. At the end he has described the way to emancipation by worshiping god[64]. The knowledge of non difference is the essence of *prakṛ ti-puruṣ a* tattva. The ignorant tends to separation[65]. Lord Śiva is the father of this world. The inseparable power of *Śiva*'s divine freedom is the mother[66]. All the messages and scriptures of the world are pervaded by the *Vimarśa-śakti* (power of self-awareness in the pure consciousness) which is inseparable from god[67]. God is the Brahman himself[68]. God's *tattva* (constituent element) can be known by doing service unto god[69] . Due to ignorance the living frame cannot know his existing form of Śiva and his sense of division generates[70]. Ignorance belongs to the part of evil spirit[71]. According to the Śaivism, the embodied being enters into

---

[59]ॐ तत् सत् इत्येभिस्त्रिभिः शब्दब्रह्मणो निर्देशः संमुखीकरणम्। Gītārthasaṅ graha, 17/26.

[60]तत् इति सर्वनामपदेन ..ब्रह्मण्युच्यते। Gītārthasaṅ graha, 17/27.

[61]अनन्ययेगेनेति 'परमात्मनो महेश्वरादन्यदपरं न किंचिदस्ति' इत्यनन्यरूपो यो निश्चयः, स एव योगः। Gītārthasaṅ graha, 13/12.

[62]प्रकृतिरिति कार्यकारणभावे हेतुः। पुरुषस्तु प्राधान्याद्भोक्ता। Gītārthasaṅ graha, 13/21.

[63]अत एवास्य शास्त्रकृद्भिर्नानाकारैर्नामभिरभिध्यते रूपम् 'उपद्रष्टा' इत्यादिभिः। Gītārthasaṅ graha, 13/23.

[64]येन केनचिदुपायेन भगवत्तत्वमुपास्यमानमुत्तारयति। Gītārthasaṅ graha,13/26.

[65]पुमान्प्रकृतिरित्येष भेदः संमूढचेतसाम्।
परिपूर्णास्तु मन्यन्ते निर्मलात्ममयं जगत्॥ Gītārthasaṅ graha, 13/35.

[66]सर्वासु योनिषु आदिकारणतया बृंहिका भगवच्छक्तिः सकलसंसारवमनस्वभावा माता। पिता त्वहं शक्तिमानव्यपदेश्यः। Gītārthasaṅ graha, 14/4.

[67]शुद्धविमर्शनिःष्यन्दवाक्तत्त्वपरमार्थपरब्रह्मस्वभावम्, स्वतन्त्रप्रसरतया आन्तरद्वोधस्वभावाद्बहिझ् प्रसरपर्यन्तम्.., Gītārthasaṅ graha,11/2.

[68]अहमेव हि ब्रह्मणि प्रतिष्ठिता। मयि सेव्यमाने ब्रह्म भवति, Gītārthasaṅ graha,14/27.

[69]ब्रह्मण एवायमंश इति। Gītārthasaṅ graha, 15/7.

[70]क्षरमतीतः भूतानां जडत्वात्। अक्षरमतीतः आत्मनोऽप्रबुद्धत्वे सर्वव्यापकत्वखण्डनात्। Gītārthasaṅ graha, 15/18.

[71]आसरीभागसन्निविष्टा तामसी किल अविद्या। Gītārthasaṅ graha, 16/5.

different body together with the constituted eight elements[72]. He is, in fact, of the nature of Śiva. In all the *śāstra*s like Veda and others it is really the Parameśvara who is expressed[73]. In the *Gītārthasaṅ graha*Abhinavagupta has, by mentioning the Śiva-Śakti-avinābhava-stotra, described the inherent and essential relation of Śiva and Śakti tattva[74]. The study is based on the impression that without understanding the proper import of the presence of the Kashmir Śaivism in the *Bhagavadgītā*, a proper understanding of the text is not possible.

Bibliography:


Devi, Prabha. *Gītārthasaṃgraha*with *Bhāṣ ā* comm. Of Prabhādevī. Srinagar: Normal Press, 1987.

Lakshmanjoo, Swami. *Bhagavad Gita In the Light of Kashmir Shaivism.* New Delhi: Ishwar Ashram Trust, 2014.

Marjanovic, Boris.*Abhinavagupta's commentary on the Bhagavad Gita GītārthaSaṁgraha.* Varanasi: India Books, 2004

SenSharma, Debabrata. *An Introduction to the AdvaitaŚaiva Philosophy of Kashmir.* Varanasi: Indica Books, 2009.

SenSharma, Debabrata. *Kashmir Shaivism.* Kolkata : Ramkrishna Mission Institute of Culture, 2016.


[72]यथा वायुः सर्वगतो विश्रान्तिधाम पार्थिवं प्राप्य ततो गन्धमानीय स्थानान्तरे तत्सहित एव संक्रामति एवं जीवः पुर्यष्टकेन सह। Gītārthasaṅ graha, 15/8.

[73]सर्वैरिति संभूय किल सर्वशास्त्राणां परमेश्वरतत्त्वमेव निरूप्यम्। Gītārthasaṅ graha,15/15.

[74]तव च काचन न स्तुतिरम्बिके
सकलशब्दमयी किल ते तनुः।....
स्तुतिजपार्चनचिन्तनचिन्तनवर्जिता
न खलु काचन कालकलापि मे॥ Gītārthasaṅ graha, 15/20.

# अभ्युदयसिद्धौ संस्कारोपयोगः

Dr. Surajit Banerjee
Assistant Professor in Sanskrit,
Ramakrishna Mission Residential College (Autonomous),
Narendrapur, Kolkata.

**विषयसारः-** भारतीयायुर्विज्ञानेन निश्चीयते यन्मनो मनुष्यस्यैहिकमुपादानम् एकम्। तदेव मनुष्यं केनापि अनिर्वचनीयेन पक्षेण बध्नाति। कथमपि च तस्माद् विमोचयति। बन्धनं तु स्वाभाविकं, मोचनं तु आयाससाध्यम्। इच्छाद्वेषप्रयत्नादिभिरेतद्द्वयं सम्भवति। अस्माद्धेतोर्मनसः कश्चन संस्कारोऽपेक्ष्यते। धर्मशास्त्रेषु स संस्कारश्चित्तशुद्धिरिति कथ्यते। संस्कृतेन मनसा मनुष्यः प्रयोजनीयतामनुभवति, अप्रयोजनीयताञ्च विजहाति। एतेन एकप्रकारकी मानसिकता सृज्यते या परोक्षतया अभ्युदयसिद्धौ ऐकान्तिकोपयोगिनी भवति।

**शब्दाङ्कूटाः-** *अभ्युदयः, संस्कारः, योग्यता, सामाजिकता, मूल्यम्, आचार आचरणञ्च, वैयक्तिकम्, आत्मोपलब्धिः*।

आजन्मनो मनुष्याः संस्कारनियमिता भवन्ति। संस्काराणाम् अनुशीलनेन मनसि एका योग्यता उपपद्यते यया दोषापनयनं गुणान्तरोपजननञ्च भवतः। तन्त्रवार्त्तिके एवोक्तं-'योग्यतां चादधानाः क्रियाः संस्काराः इत्युच्यन्ते"[1] इति। एते गर्भाधानादयः संस्काराः शरीरं संस्कुर्वन्तः सर्वेषु अदृष्टार्थेषु कर्मसु योग्यातातिशयं कुर्वन्ति। फलातिशयश्च भवति योग्यतातिशय्ये। इयमेव योग्यता मूल्यपदवाच्या। मातापितरौ शरीरमेव जनयतः, परन्तु संस्कार एव स यः खलु दोषादीनां स्खलनेन न केवलं शरीरस्यापि तु मनसः शुद्धिं संसाधयति। सुप्राचीनकालाद् ये संस्कारा भवन्ति अनुशीलिता अस्माभिः तस्य सांकल्पिकं प्रयोगनिमित्तं विविधा आशयो वर्तन्ते। तत्रादौ तु भवति सश्रद्धं लोकाभिमतं यत् संशयातीतविश्रम्भात् भवति प्रसूतम्। अतिमानविकसत्तायां विश्वासिनः सदैव परमात्मनो देवानाञ्च आनुकूल्यं कामयमानाश्च मनुष्या आत्मानां विकाशसमृद्धयो औपरोधिकप्रभावान् सयत्नेन दूरीकृत्य औपकारिकान् फलप्रदान् वा प्रभावान् कामयन्ते। तत्रत एव एतेषां

[1]तन्त्रवार्त्तिकम्-पृ-1078.

संस्काराणाम् आविर्भावोऽभवत्। औपरधिकप्रभावान् दूरीकरणार्थं तथा औपकारिकफलप्राप्त्यर्थं केषाञ्चन उपायानाम् आश्रयणं स्वीकृतं साधारणैः मनुष्यैः। आदौ तु भवति तत्र दूरात्मानाम् असूराणाञ्च अन्नदानमानादिभिः सन्तुष्टिसाधनं, येन सन्तुष्टा एतयः न गृहस्थस्य तथा तस्य परिवारस्य हानिं न साधयितुम् अलम्। जातकर्मसंस्कारे च दृश्यते एतत् यत् सन्तानस्य निरोगशरीरकामयमानेन पित्रा कुमारकुर्कुरादीनां मारणगदानां प्रणेतृणां दुष्टात्मानां सन्तुष्टिविधानं क्रियते[2]। द्वितीयन्तु तावत् सयत्नेन तेषां प्रवञ्चनं येन ते न खलु भवन्ति समर्थाः अहितसंसाधनाय अज्ञानवशादपि। अन्त्येष्टिसंस्कारेऽपि चैतत् दरीदृश्यते अस्माभिः। म्रियमाणस्य जनस्य चित्रं दाह्यते तस्य स्वात्मीयैः। चित्रदहनमाध्यमेन एव म्रियमानस्य जनस्य शरीरस्य नाश एवात्र कल्पितः। अतो मृतस्य जनस्य पुनो मरणं नैव भवितुम् अर्हति। ततो मृत्युर्देवता म्रियमाणं तं जनं मृतः अन्त्येष्टिसंकारेण संस्कृतो वा मन्यमानो विजहाति। अनेन प्रवञ्चनेन एव औपरोधिकप्रभावा दूरीक्रियन्ते[3]। यदि सन्तुष्टिप्रवञ्चनौ इति उपायाभ्यां न भवति दूरीभूता औपरोधिकप्रभावाः, तदा तृतीयन्तु विताडनं नाम उपाय आश्रीयते औपकारिकफलाकाङ्क्षिभिः मनुष्यैः। ये खलु अहितसाधका दुष्टात्मनश्च ते प्रत्यासन्ना विताडिताश्च भवन्ति। कदापि वा तेषां दुष्टात्मानां विताडननिमित्तम् अभीष्टदेवानामेव आश्रयणं भवति अभीप्सितम्। विवाहसंस्कारे चतुर्थीकर्म कुर्वन् वरः चन्द्राग्निवायुगन्धर्वान् देवान् आह्वयति नवोढां कन्यकां दुष्टात्मनः प्रभावात् रक्षणार्थं तथा भावि सांसारिकमङ्गलार्थञ्च। कदापि वा स स्वयम् अग्निजलादिभिः संशोधनद्रव्यैः दुष्टात्मान् अहितकारकान् च भाययति ताडयति च। जलम् अग्निश्च प्रायः सर्वविधेषु संस्कारेषु शुद्धिकर्मणि व्यवहृतौ भवतः। समावर्तनसंस्कारे स्नातको गुरुणा दत्तानुज्ञः सन् स्वगृह्योक्तविधिना स्नानं सम्पादयति। अतः स्नानद्वारेणैव ब्रह्मचर्याश्रमसमापनात् अनन्तरं गार्हस्थाश्रमप्रवेशो भवति। अत्र विशेषतया यमनियमेति ब्रह्मचारिधर्माणां त्यागो भवति। अयं त्यागो हि गार्हस्थाश्रमे पाणिग्रहणार्थं द्वारस्वरूपो भवति। अपरतः

---

[2]गौतमगृह्यसूत्रम्-7/17.

[3]R.B.Panday. “The Saṃskāras”. B.K.Swain. *The Dharmśāstra*: an Introductory Analysis. Delhi: Akshaya Prakashan, 2004. p.139.

अन्त्येष्टिसंस्कारे मृतस्य भौतिकस्य शरीरस्य अग्नीन्धनादीना नाश एव तस्यैव भौतिकस्य शरीरस्य संशुद्धिरेव सूचयति।

यतः संस्कारस्य उद्देश्यं भवति न केवलं दोषापनयनम्, अपि तु गुणान्तरजननमेव संस्कारेणैव भवति इति मया पूर्वमेवोक्तं ततः औपरोधिकप्रभावदूरीकरणार्थं यथा अनिष्टकारकाणां दुष्टात्मनां विताडनादिकं कार्यम् अभीप्सितं तद्वत् औपकारिकफलप्राप्त्यर्थमेव प्रयत्नः नेतव्यः हिताकाङ्क्षिभिः मनुष्यैः। मनुष्यजीवनस्य प्रत्येकपादे एकैकः अभीष्टदेवो भवति अधिष्ठितः। ततो जीवनचर्यायां सर्वेऽस्मिन् क्षेत्रे अभीष्टदेवानाम् आशीरेव इप्सिता मनुष्यैः। गर्भाधानसंस्कारे विष्णुरेव अभीष्टो देवः, उद्वाहकर्मसु प्रजापतिः, उपनयनकर्मणि बृहस्पतिश्च। न केवलम् अभीष्टदेवानाम् उपासनेन अपि च, मनुष्याः परस्परसहयोगेन एकाम् आनुकुलिकीं स्थितिमुपसर्जन्ति, या परोक्षतया मनोनैतिकमूल्यानामुद्वहनेन औपकारिकफलप्रसवा भवति। विवाहसंस्कारे उपनयनसंस्कारे च गुरुशिष्ययोः वरकन्ययोश्च हृदयस्पर्शरूपसंस्कारः उभययोः ऐकान्तिकमेलनं सूचयति। हृदयस्पर्शेन अत्र उभययोः सममनस्कत्वं भवति प्रतीतम् । विद्या तु तदैव हृदि स्थास्यति चिरा यदा भवति हृदयेन अभ्यनुज्ञाता सा। अपरतः श्वास एव भवति जीवच्छरीरस्य परिचायकः, ततो जातकर्मादिषु कस्यचिदपि पितुः पुत्रस्य शिरसि श्वासवायुविघातस्तस्यैव नवजातकस्य श्वासं दृढीकरोति। एतेन पुत्रस्य आयुर्भवति वर्धितः। परिकर्म तु स्नेहातिशय्येन प्रेम्णः दार्ढ्यं सूचयति। विवाहसंस्कारे वरकन्ययोः एकात्मकताम् अभीष्टदेवेभ्यः प्रार्थयतं वरं कन्यायाः पिता परिकर्मायति[4]। अतः अभीष्टदेवमुद्दिश्य पूजनं तथा काम्यवस्तूनाञ्च तेभ्यः प्रार्थनमेव पक्षान्तरे जागतिकं सुखं संसाधयति। यज्ञादिकार्यैः तुष्टा हृष्टाश्च देवाः पशुपुत्रसम्पदां प्रसवैः मनुष्याणां जागतिकं कल्याणं साधयन्ति। अपि च, मनुष्यास्तीक्ष्णधीसम्पन्ना देहसौष्ठवस्य च अधिकारिणो भवेयुः देवतानुग्रहादिति।

अत्रेदं न विस्मर्तव्यं यत् मनुष्या न केवलं देवप्रसादलाभार्थं, न वा औपरोधिकप्रभावानां दूरीकरणार्थं एतेषां संस्काराणाम् अनुष्ठानं कुर्वन्ति अपि च आत्मानां सुखदुःखानुभूतेः प्रकाशनार्थमेव एतेषाम् अनुशीलनं

---

[4]पारस्करगृह्यसूत्रम्-2/7/11-13.

कुर्वन्ति एव। यतः सुतजननं कामदं ततः सन्तानोत्पत्तेरनन्तरं तेन पित्रा सुखातिशय्यं प्रकटनार्थं जातकर्मसंस्कारः अनुष्ठीयते। विवाहसंस्कार एव स द्वारस्वरूपो यत्र कोऽपि मनुष्यो ब्रह्मचर्याश्रमे यथाविधिः आहृतानां विद्यानां प्रयोगनिमित्तं गार्हस्थाश्रमं प्रविशति। अन्येषां त्रिविधानाम् आश्रमाणाञ्च धारकः सन् अयं गार्हस्थाश्रमो व्यक्तिजीवने सुखातिशय्यं प्रकटयति। अतो यतो द्वारकर्मणा भवति गार्हस्थाश्रमे प्रवेशाधिकारस्ततः आनन्दातिशय्यं प्रकाशनार्थम् उद्वाहसंस्कारः अनुष्ठीयते। अपरतो मृत्युर्भवति दुःखदः। ततो मरणात्परं मृतस्य जनस्य लोकान्तरप्राप्त्यर्थं दुःखपीडितेन मनसा अन्त्येष्टिसंस्कारः अनुष्ठीयते। अत आत्माभिव्यक्तेः प्रकाशनमेव संस्कारद्वारा सम्भवति।

यतोऽस्माकं षाट्कौशिकं शरीरं पितृतः अस्थिस्नायुमज्जानः त्रीणि मातृतः त्वङ्मांसरुधिराणि त्रीणि उपादानानि आहृत्य अभवत्[5]। ततः पुत्रशरीरे पैतृकरेतदोषम् अशुचिमातृगर्भवासजञ्च गार्भिकं पापं समुत्पद्यते। अतः पापक्षयहेतुत्वं गर्भाधानादिसंस्कारा अनुष्ठीयन्ते। एतैः संस्कारैः द्विजातीनां यद् वैजिकं प्रतिषिद्धमैथुनसंकल्पादिना जातं गार्भिकं पापम् अपमृज्यते। याज्ञवल्क्येनापि समर्थितमेतत् यत् गर्भाधानादिभिः संस्कारकर्मभिः कृतैः गार्भिकं पापं भवति प्रशमितम्[6]। तनोः ब्राह्मीकरणनिमित्तम् एतेषां संस्काराणाम् आवश्यकानुभवो धर्मशास्त्रकारैः स्वीकृतः। यतः संस्काराणां मुख्यमुद्देश्यन्तु शुद्धिकरणं ततः शरीरेण साकम् आत्मनः शुद्धिरपि अपरिहार्या। अतो ब्रह्मप्राप्तियोग्येयं तनुः तन्वच्छिन्नात्मा क्रियते, कर्मसहकृतब्रह्मज्ञानेन मोक्षावाप्तेः। न केवलमेतत् एते संस्कारा एव सामाजिकमर्यादायाः सूचका भवन्ति। मातृगर्भात् प्रसूतः सुतो ब्राह्मणकुले जातोऽपि न ब्राह्मणपदवाच्यो भवति। जन्मनः परं स शुद्र इव प्रतिभाति। उपनयनसंस्कारादेव तस्य द्विजातीयत्वं, ततो यथाविधिना स्वाध्यायाध्ययनेन विप्रत्वम्, अन्तिमे च परमात्मनः उपलब्धिद्वारेण तस्य ब्राह्मणत्वं भवति सिद्धम्। तदा एव कारणपुरुषस्य ब्रह्मणः सम्बन्धिनी भवति इयं तनुः[7]। उपनयनसंस्कारो हि आर्यसभ्यतायां तथा तस्याः सुप्राचीनेषु शब्दभाण्डारेषु प्रवेशद्वारः। समावर्तनसंस्कार एव

---

[5]"एतत् षाट्कौशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतः।
अस्थिस्नायुमज्जानः पितृतस्त्वङ्मांसरुधिराणि मातृतः॥" –गर्भोपनिषत् (quoted in मिताक्षरा of याज्ञवल्क्यस्मृतिः I/52)

[6]एवमेनं शमं याति बीजकर्मसमुद्भवम्- याज्ञवल्क्यस्मृतिः-1/13.

[7]अत्रिसंहिता-141-142.

सांसारिककर्मारम्भं सूचयति। विवाहसंस्कारादनन्तरं गार्हपत्याग्नौ यज्ञकर्मादिषु पुरुषस्याधिकारो भवति सृष्टः। अग्निहोत्रहोमस्य जीवनावधिकर्तव्यत्वेन श्रुतत्वात्, स च गृहस्थाश्रमेण कर्तुं विहितत्वाद् आजीवनं गृहस्थाश्रमे स्थातव्यमिति साक्षाद् आक्षिप्यते। अग्निहोत्रादीनि कर्माणि गृहस्थाश्रमसाध्यानि अतस्तेन कर्मणा जीवनं निर्वाहयितव्यमिति मस्करिमतम्[8]। संस्कारादीनाम् अपरमुद्देश्यं भवति स्वर्गलाभस्ततो मोक्षप्राप्तिः। ब्राह्मसंस्कारेण संस्कृतो मनुष्यः ऋषिसदृशां मर्यादां प्राप्नोति। अपरतो दैवसंस्कारेण संस्कृतो मनुष्यो देवसदृशो भवति। अतो यदि स्वर्गप्राप्तिर्भवेत् जीवनस्य लक्ष्यं तर्हि ततस्तस्या एव अदृष्टसत्तायाः प्रापका भवन्ति एते संस्काराः।

संस्कार एव व्यक्तेः वैयक्तिकाभ्युदयं तथा सामाजिकाभ्युदयं प्रति जीवनं निर्दिशति। आजीवनं तथा मरणात्परमपि एते संस्कारा आत्मानं प्रभवन्ति। चित्राङ्कनसमये चित्रकरः पटादौ मसीरेखाभिः सर्वावयवपूर्णानि मनुष्यादिरूपाणि चित्रयति, परन्तु नानाविधवर्णप्रक्षेपेण विना एतानि अवयवानि न भवन्ति दर्शनियानि मनोग्राहकानि च। ततो नानाविधवर्णप्रक्षेप एव तस्यैव अवयवस्य दर्शनीयत्वं सूचयति। तद्वत् मनुष्याणां जागतिकाभ्युदयः चरितमानोन्नयनेन भवति एतेषां संस्काराणां यथाविधिपूर्वकैः आचरणैश्च। ततो जातिब्राह्मण्यमपि शास्त्रीयसंस्कारैरेव उत्पद्यते। जन्मना जायते शुद्रः, संस्कारकर्मभिः संस्कृतः स ब्राह्मणपदवीम् आरोहति[9]। संस्कारा एव मानवजीवनं यथाविधिना नियमन्ति येन अभीष्टम् अभ्युदयसाधनं भवति सुकरम्। गार्हस्थाश्रमे पुत्रोत्पादनार्थं वरकन्ययोः मानसिकी तथा दैहिकी योग्यता अपेक्षते। गर्भाधानसंस्कारस्तावदेव अनुष्ठीयते यदा वरकन्ययोः उभययोः सन्तानोत्पादनरूपं कायिकं सामर्थ्यं स्यात्। अपि च, सुतजननिमित्तम् उभययोः अभिलाषः स्यात् यत् हार्दिकेन मेलबन्धनेन विना न सम्भवति। गर्भावस्थायाम् अयं संस्कारविशेषः कन्यकां तथा तद्गर्भस्थं सुतं च अनीष्टप्रभावात् रक्षति। जातकर्मसंस्कारे जातस्य सन्तानस्य नीरोगायुर्वर्धकम् आयुष्यानुष्ठानं मेधसे प्रज्ञाननं चेति अनुष्ठानानि अनुष्ठीयन्ते।

[8]“यद्यपि गृहस्थो भवेदित्येवं न विहितं, तथापि अग्निहोत्रादिगृहस्थसाध्यक्रियाविधानात् तस्यैव विधानं द्रष्टव्यम्” –मस्करिः -3/36.

[9]“ चित्रकर्म यथानेकैरङ्गैरुन्मिल्यते शनैः।
ब्राह्मण्यमपि तद्वद्धि संस्कारैर्मन्त्रपूर्वकैः।।”- पराशरस्मृतिः-8/19.

गर्भाधानसंस्काराद् उपनयनपर्यन्तं शिशवः कामचाराः कामभक्ष्याः कामवादाश्च भवन्ति। अस्मिन् समये शिशोः जीवनं भवति सम्भावनामयं, ततस्तस्यैव जीवनस्य सम्भावनायाः स्वतो विकाशनार्थं बाह्यिकं नियन्त्रणं निषिध्यते। परन्तु तत्रापि नामकरणं चूडाकरणम् अन्नप्राशनम् इत्यादयः संस्कारा अनुष्ठीयन्ते शिशोः सामाजिकोपयोगसाधनार्थम्। शिशोः स्वतन्त्रसत्तायाः परिचयस्तथा व्यक्तिसत्तायाश्च उन्मेषो भवति एतैः संस्कारैः। मूल्यभित्तिकशिक्षायाः प्रादुर्भावो भवति अस्मिन्नेव समये यदा शिशुः स्वार्जिताभिज्ञया नियन्त्रितं परिवेशं सृजति, यत् परिवारभावनायाः, पक्षान्तरे च गोष्ठीभावनायाः कारणस्वरूपं भवति। चूडाकरणसंस्कारादनन्तरं यदा स बालो भवति तदा प्रतिष्ठाननियमनिगडेन तं न सन्निरूध्य तस्मै कर्तव्यकर्माणि उत्तरदायित्वानि च आरोप्यन्ते यैः कायिकमानसिकविकाशौ न भवतो बाधितौ। उपनयनादिविद्यासंस्कारैः बालकस्य हृदि सांस्कृतिकम् उद्धनं भवति विनिर्मितं, यत्र बालकस्य प्रक्षोभाभिलाषवासानां संशुद्धौ एकं सांस्कृतिकं मूल्यं भवति विनिर्मितं, यत् पक्षान्तरे अभ्युदयसाधको भवति। विवाहसंस्कारादनन्तरं गृहस्थाश्रमं प्रविश्य पुत्रकन्यादीनां प्रजननद्वारेण महायज्ञानामाचरणेन च देवादिऋणत्रयात् मुच्यते लोकः। अतः आपाततो गृहस्थाश्रम एव एतत् ऋणत्रयशोधनार्थाधिकरणम्। व्यवहारधर्मत्वेन वर्णितो विषयो गृहस्थस्य कृते एव उपयुज्यते, यतो यत्र जागतिकवस्तुजातानि तदधीनत्वेन वर्तमानानि कदाचिदधिकारप्रयोगोपयोगेषु विप्रतिपद्यमानानि भवन्ति[10]। वस्तुतः सर्वेषां धर्माणां संरक्षणार्थं किञ्च व्यवस्थापनार्थं गृहस्थाश्रमः अवश्यमेव अङ्गीकर्तव्यः। मनुष्यसमाजसौष्ठवनिमित्तम् आत्मिकविशेषार्थञ्च मानविकतायाः सामाजिकविवर्तनं साधयन्ति एते संस्काराः। अतः एतेषां संस्कारादीनाम् आवश्यकताम् अनुकल्पयन्तो धर्मशास्त्रकारिणः कृष्टेः चरितस्य च मानोन्नयनैः आदर्शायितमानवताया विवर्तनमेव अभिलक्ष्यन्ति। ततः परस्परसहयोगेन कृष्टेः मानवतायाश्च दानादानैः संस्कृता जीवाः सामाजिकाः राष्ट्रियाश्च भवन्ति। एते संस्काराः न कदापि व्यक्तिपरिसरपरिमिताः सन्तो नैतिकमूल्यानाम् उद्वर्तनक्षमा भवन्ति।

---

[10]B.K.Swain. *Smṛtimīmāṃsā*. Delhi: Akshaya Prakashan, 2006. p-15.

एषः संस्कार एव आध्यात्मिकताया आनुपदिकम् अनुशीलनं, येन मनुष्यस्य आत्मोपलब्धिर्भवति। आजीवनम् अनुष्ठितं प्रत्येकं कायिकं तथा मानसिकं व्यापारविशेषम् आध्यात्मिकसत्येन भवति अन्वितम्। एते संस्कारा आत्मोपलब्धेः उन्मेषशैल्या पूर्णतां संसाधयन्ति। एतेषां संस्काराणां यथाविधिना अनुष्ठानेन मनुष्यः आध्यात्मिकशृङ्खलेन निगडितः सन् जागतिकम् अभ्युदयम् अतिरिच्य आत्मप्रतिष्ठायां लब्धकामो भवति। ततः अभ्युदयेन साकं निःश्रेयससः साधनं तेन अपेक्षितं वर्तते। अतो निःश्रेयसेन साकम् अभ्युदयप्राप्तौ यतमाना मनुष्याः संस्कारान् आध्यात्मिकसाधनानि इति मन्यमानाः च आत्मोपलब्धौ यतेयुरिति। अत्मोपलब्धेरनन्तरं सर्वभूतेषु आत्मानम् आत्मना पश्यतो जनो ब्रह्मेति परं पदं लभते, यत्रतो न भवति कदापि तस्य स्खलनम्। संस्कारा एव आध्यात्मिकतायाः प्रकाशमाना अवयवस्वरूपाः[11]। अतः संस्काराणाम् आनुष्ठिकताम् अतिरिच्य निःश्रेयसेन साकं वैयक्तिकाभ्युदयप्राप्तौ कापि अदृश्या शक्तिरेव उपपद्यते एतेषाम् अनुष्ठानैः, या पक्षान्तरे आत्मोपलब्धेः सहायका भवति। ततः स्मार्तानां नये तु एते संस्काराः प्रत्यक्षाभिज्ञतायाः स्रवद्दृष्टान्तस्वरूपाः, न केवला उदासीनानुष्ठानमात्रपर्यवसिताः। अत एते संस्कारा वैयक्तिकमूल्यानां सांस्कृतिकमूल्यानाम् आध्यात्मिकमूल्यानाञ्च उद्वर्तका भवन्ति।

## सहायकग्रन्थसूची

Auboyer, J. *Daily Life in Ancient India.* New Delhi: Munshiram Manoharlal Publishers Pvt. Ltd., 1994, 1961 (1st ed.).

Ayer, P.S.S. *Evolution of Hindu Moral Ideals*. Delhi: Nag Publishers, 1976. Reprint, 1935.(1st Ed.).

Banerjee, S.C. *A Brief History of Dharmaśāstra.* New Delhi: Abhinav Publications, 1999.

Banerjee, S.C. *Dharma-sūtras- A study in their Origin and Development.* Calcutta: Puthi Pustak, 1962.

Banerjee, S.C. *Society in Ancient India.* New Delhi: Abhinav Publications, 1993.

Buch, M.A. *The Principles of Hindu Ethics.* Delhi: Bharatiya Kala Prakashan, 2003 (Rev. ed.), 1921 (1st ed.).

Choudhuri, U. & Choudhuri, I.N. *Hinduism- A Way of Life and a Mode of Thought.* New Delhi: Niyogi Books, 2012.

Creel, A.B. *Dharma in Hindu Ethics.*Calcutta: Firma KLM, 1977.

Das, S.K. *The Educational Systems of the Hindus.* Calcutta: Calcutta University Press, 1930.

Gautama. *Gautamadharmasūtram.* Ed. U.C.Pandey. Varanasi: Chaukhambha Sanskrit Sansthan, 2000.

Hiriyanna, M. *Indian Conception of Value.* Mysore: Kavyalaya Prakashan, 1975(Reprint).

Jois, M.R. *Human Rights and Indian Values.* New Delhi: National Council of Educational Research and Training, 1997.

Jolly, J. (Ed.). *Manuṭīkāsangraha.* Calcutta: The Asiatic Society, 1986 (Reprint), 1985-89 (1st Pub).

---

[11] "They were 'an outward visible sign of an inward spiritual grace."- R.B. Pandey. "The Samskāras". B.K. Swain. *The Dharmaśāstra: an Introductory Analysis*. Delhi: Akshaya Prakashan, 2004. p.146

Kane, P.V. *History of Dharmaśāstra*. Vol. II. Part 1. Pune: Bhandarkar Oriental Research Institute, 1997 (3rd Ed.), 1941 (1st Ed.).

Kapani, L. *The Philosophical Concept of Saṃskāra*. Delhi: Motilal Banarsidass Publishers Private Limited, 2013.

Kauṭilya. *Arthaśāstram*. Ed. T.G.Shastri. New Delhi: Rashtriya Sanskrit Sansthan, 2002.

Krishnamurti, J. *Education and the Significance of Life*. California: Krishnamurti Foundation of America, 1953 (e-book).

Kumar, N. *Dharmasūtrīya Ācārasaṃhitā*. Delhi: Vidyanidhi Prakashan, 1999.

Kuppuswamy, B. *Elements of Social Psychology*. Delhi: Kaveri Pvt. Ltd., 1983.

Maitra, S.K. *The Ethics of the Hindus*. Kolkata: University of Calcutta, 1956 (2nd Ed.).

Mangal, S.K. *Essentials of Educational Psychology*. New Delhi: Prentice Hall of India Private Limited, 2008.

Manu. *Manusamhitā*. Ed. M. Banerjee. Kolkata: Sanskrit Pustak Bhandar, 2003.

Maxmuller, F.(Ed) *Sacred Books of The East*. Vol. 2 & 25. Delhi: Motilal Banarsidass Publishers Private Limited, 2007 (Reprint), 1879 (1st Ed.).

Mckenzie, J. *Hindu Ethics- A Historical and Critical Essay*. New Delhi: Oriental Reprint, 1992 (2nd Ed.), 1920 (1st Pub. by Oxford University Press, London).

Mess, G.H. *Dharma and Society*. Delhi: Gyan Publishing House, 1986 (e-book).

Mishra, K. *Dharmasastrasabdakosa. Vol. I & II*. Ed. B. Panda. Bhubaneswar: Directorate of Tourism, Sports and Culture, 1985.

Moghe, S.G. *Bhārataratna Mahāmahopādhyāya Dr. P.V.Kane's History of Dharmaśāstra- in Essence*. Pune: Bhandarkar Oriental Research Institute, 2000.

Mookerji, R.K. *Ancient Indian Education- Brahmanical and Buddhist*. Delhi: Motilal Banarsidass Publishers Private Limited, 2003 (2nd Ed. Reprint), 1947 (1st Ed.).

Mukherjee, D.P. *Value Education- The Indian Tradition*. Mumbai: Bharatiya Vidya Bhavan, 2004.

Nigal, S.G. *Vedic Philosophy of Values*. New Delhi: Northern Book Centre, 2009.

Olivelle, P. *Dharmasūtra Paralles*. New Delhi: Motilal Banarsidass Publishers Private Limited, 2005.

Olivelle, P. *The Āśrama System: The History and Hermeneutics of a Religious Institution*. New Delhi: Munshiram Manoharlal Publishers Pvt. Ltd., 2004.

Pande, G.C. *Mūlyamīmāṃsā*. Allahabad: Raka Prakashan, 2005 (2nd ed.).

Pandey, R. *Hindu Saṃskāras- Socio Religious study of the Hindu Sacraments*.Delhi: Motilal Banarsidass Publishers Private Limited, 1969 (2nd Revised Ed.), 1949 (1st Ed.).

Radhakrishnan, S. *Indian Philosophy*. Vol.1. London: Allen & Unwin (India) Pvt. Ltd., 1958.

Sengupta, P. *Everyday Life in Ancient India*. London: Oxford University Press, 1950. (e-book).

Sharma, K.M. *Dharmaśāstraśabdakośaḥ*. Vol.1. Ed. B.Panda. Bhubaneshwar: Directorate of Tourism, Sports & Culture, 1981.

Swain, B.K. *Dharmaśāstra- A Link between Tradition and Modernity*. Varanasi: Chaukhambha Sanskrit Bhawan, 2003.

Swain, B.K. *Smṛtimīmāṃsā*. Delhi: Akshaya Prakashan, 2006.

Swami, C.S. *Hindu Dharma- The Universal Way of Life*. Ed. S. Ramakrishnan. Trans. R.G.K. Mumbai: Bharatiya Vidya Bhavan, 2008 (5th ed.), 1995 (1st ed.).

# The Relationship between Vedic Sanskrit and Avestan (Old Persian) Language

**Dr. Bidisha Misra**
Assistant Professor (Stage-2)
Department of Sanskrit
Lady Brabourne College

**Abstract—**On the linguistical approach we can find that Vedic Sanskrit (Indo-Aryan language) and Avestan (ancient Iranian Language) both belong to Indo-Iranian linguistic group, of which Avestan froms the ancestor of East Iranian family of languages, while Vedic language is the ancestor of Indo-Aryan languages. The Rig Vedic and Avestan languages are almost the same, with very minor differences in grammar. They share a common vocabulary in the fields of mythology, ritual, culture and religious practices. It is generally believed that the language that evolved into the Indo-European languages originated in the region in the vicinity of the Caspian Sea. The languages of Iran and North India both underwent evaluation. The religious tracts of North India are the *Vedas* and the religious tracts of ancient Iran are known as the *Avesta.* The languages of the *Avesta* and the *Vedas* shared almost same vocabulary that is not shared with the other Indo-European languages. Generally if we look at the Avestan and Vedic language, we can see that 'h' in one language has been renamed as 's' in another. In the field of

religion, we can find some interesting contrasts. Both The Rig Vedic and the Avestan people both called themselves Arya, meaning noble. So *Rigveda* and *Avesta* are Aryan documents therefore need to be read together.

*Key words—Vedas, Avesta, Indo-Iranian linguistic Group, Asura, Daiva*

**Introduction—**India's political, economic and cultural ties with West Asia may be traced back

to earlier times; but these direct contacts were virtually snapped during the period of European colonial domination. Nevertheless, for generations, popular Indian images of West Asia have been shaped by stories of Egyptian pharaohs and pyramids and by the stories of Arabian Nights. But the relationship is sustained from the pre-Christian era. Vedic Sanskrit belongs to Indo-Aryan subgroup of the Indo-European language Family. It is an ancient language. It is attested in the *Vedas* and related literature[1]. Compiled over the period of the mid-2nd to mid-1st-millennium BCE. The Sanskrit word *Veda* means literally knowledge or wisdom. It is before classical Sanskrit. In the pre-historic era, Proto-Indo-Iranian language split into Proto-Iranian and Proto-Indo-Aryan and the two languages evolved independently of each other[2]. On linguistic grounds the separation of Proto-Indo-Iranian language into Proto-Iranian and Proto-Indo-Aryan happened around or before 1800 BCE. The oldest hymns of the Rigveda is estimated to compile roughly in 1500 BCE. It is to mention here that in the 1700 AD the Proto-Rigvedic intrusion to Punjab occurred. On the other hand historically Avestan known as Zend. It is comprised as two languages-

Old Avestan and Younger Avestan. These are known only from their use as the language of Zoroastrian scripture (the *Avesta).* Both are early Iranian languages, a branch of the Indo-Iranian languages within the Indo-European family. As such, old Avestan is quite close in grammar and lexicon to Vedic Sanskrit, the oldest preserved Indo-Aryan language. Old Avestan is closely related to old Persian and largely agrees morphologically with Vedic Sanskrit. So Avestan and Vedic Sanskrit are of Indo-Iranian linguistic group, of which Avestan forms the ancestor of East Iranian family of languages, while Vedic language is the ancestor of Indo-Aryan languages.

**The Backstory—**In 1786, Sir William Jones, a the then British judge in Calcutta noticed that there were some striking similarities in the vocabulary and grammar of Sanskrit, Persian, Greek, Latin, Celtic and Gothic. This discovery has created a new field of learning called Comparative linguistics which led scholars to believe that all these above mentioned languages were derived from a pre-Indo-European language which was originally evolved from somewhere in Northern Europe, Central Asia, Southern Russia. According to Romila Thapar, these Indo-European speakers had their habitat in central Asia and they gradually branched out in search of fresh pastures which took many centuries. According to her, it is these central Asian migrants who wrote the *Avesta* in Iran and Rigveda in India. The scripture of the Zoroastrians is the *Avesta.* There is an argument that people who migrated to India were dissidents of the old-Iranian, so we can find a significant reversal of meaning of the words which are both common to *Avesta* and

*Rigveda.* During the Sasanian period the *Avesta* was translated into Pahlavi and this version is called *Zend Avesta*.

**Probable dates of Avesta and Rigveda—**According to Prof. Thapar, the date of Avesta is Controversial, but a mid-second millennium date is now being accepted. She also considers the Hittite-Mittani treaty as more archaic than the Rigvedic Sanskrit. The texts of *Aveta* were collated over several hundred years and have been dated linguistically to around 1000 BCE. Both the *Avesta* and the Rigvedic texts are thought to been transmitted orally for centuries before they were written down and so it is hard to put a date to it. Georg Fuerstien, Subhash Kak and David Frawley dismiss the dates suggested by Romila Thapar, A.L. Basham and Max Muller, in their book In search of the Cradle of Civilization. According to them, it is mentioned in the *Rigveda* the river Sarasvati which disappeared in 1900 BCE, so it has to be considered that *Rigveda* is at least eight centuries older than Max Muller's arbitrary date of 1200 BCE. Vedic literature is considered older than Avestan literature by 500-1000 years though the dating of both is speculative. The Mittani Indo-Aryan language has *aika* instead of *eka* which is why it is considered older than Vedic Sanskrit or Avestan. Vedic Sanskrit is supposed to have merged ai to e and hence is considered younger. But if we take the word seven in Mittani-satta, it is considered to be much later than Vedic Sanskrit. So this dating based on selectively chosen words cannot be trusted fully. If we observe these two languages we can see that *'h'* in one language has been renamed as 's' in another. People like Rajesh Kochchar and Romila Thapar

believe that the Vedic people actually migrated from the Haraxvati (Saraswati) region in Afghanistan and the mythical Saraswati is not flowing underground through Rajasthan.

**The relationship of Vedic Sanskrit and Avestan (Old Persian)—** It is believed that some of the Indo-Europeans migrated into the Oxus River Valley and the Iranian Plateau. Others migrated to the north and west where their language evolved into the languages of Europe. Some went northeast where their language evolved into Tocharian. There were migrations into North India from Iran and to the east and west into the Tigris-Euphrates river valleys where they established the Mitanni Empire. The migration into North India was, of course, the far most important of the migrations from Iran. The languages of Iran and North India underwent evolution so it was not immediately obvious that they were related. The religious tracts of Ancient Iran are known as the *Avesta.* Some of these are believed to have been composed by Zoroaster. The religious tracts of North India are the Vedas. Grammatically there is little difference between the languages of the *Avesta* and the Vedas. Both the languages underwent systematic phonetic change. They also share a common vocabulary in the fields of mythology, ritual, culture and religious practices. There are some phonetic differences but the changes take place according to well defined rules where Sanskrit s changes into *h* and *h* into z. Ahura in *Avesta* is derived as asura in the *Rigveda* with the same meaning, lord. Asura as a demon is a later development. The *Avesta* consists of three parts, those are Yasna, Visperad and Vendidad. Yasna has 17 hymns, called Gathas, which are attributed to Zarathushtra himself and

thus constitute the oldest parts of the *Avesta.* Zarathushtra introduces some points of departure from the *Rigveda* but he has not denied the Joint Indo-Iranian legacy. It is found that *Deva* and *Indra* become demons in the *Avesta.* Vritrahana who is identified with Indra in *Rigveda* retains his position in *Avesta* as a god in his own right. The Avestan and the Rigvedic people both called themselves Arya, meaning noble. So these texts are considered as Aryan documents. According to T. Burrow, it is quite possible to find verses in the oldest portion of the *Avesta,* which simply by phonetic substitutions according to established laws can be turned into intelligible Sanskrit. Historically it is found that a treaty signed by the Hittttes and Mitannis dating to the fourteenth century BC calls upon Indara/ Indra, Mitras/ Mitra, Nasatianna/ Nasatya and Uruvanass/ Varuna, all known to *Rigveda* and *Avesta.* The languages of the *Avesta* and the *Vedas* shared almost same vocabulary that is not shared with the other Indo-European languages. Some examples are - gold-hiranya (Sanskrit)-zaranya (Avestan), army-sena (Sanskrit)-haena (Avestan), spear-rsti (Sanskrit)-arsti (Avestan), sacrifice-yajna (Sanskrit)-yasna (Avestan), lord-asura (Sanskrit)-ahura (Avestan), sacrificing priest-hotar(Sanskrit)-Zoatar(Avestan), sacrificing drink-soma(Sanskrit)-haoma(Avestan), god-deva(Sanskrit)-daeva(Avestan). In the field of religion also there are also some interesting contrasts. Words such as *deva* have the meaning of god in the *Vedas* have the meaning of devil in the *Avesta.* Likewise some names for Vedic gods show up in the *Avesta* as evil spirits. There are similarities in rituals too. In India, upanayana is a ritual by which a boy becomes a full

member of his class. Zoroastrians have a similar ceremony called Navjot which is practiced by Parsis till now. At the time of composition of the Vedas, Varuna was losing his importance to Indra. In the *Avesta,* Ahura Mazda is the main divinity and some people think that he is the same as Varuna. Varuna sat with his spies who flew all around the world and bought back reports on the conduct of mortals. He regarded sin with hatred and intensely disliked anger, drink and gambling.

**Religious and cultural aspects of these two languages—** Scholars of the ancient world generally agree that in Iran the religion of devas was current before the advent of Zarathushtra. So it was a pre-Zoroastrian religion. The similarities between the pre- Zoroastrian Persian religion and the Vedic religion are too many. The term Zoroastrian is after the name of the prophet Zarathustra (zarat, like Sanskrit harit, golden; ustra means camel in Sanskrit or Old Persian. It has been estimated that he was there around the time 1200 BC or perhaps half a millennium later. Zoroastrians refer their religion as Mazdayasna, the religion of Ahura Mazda (Sanskrit Asura Medha, Lord of Wisdom). The Rigveda 8.6.10 has the expression medhaam ritasya, wisdom of truth Zarathushtra came from Bactria in northeast Iran near Afghanistan. The Avesta speaks of several lands like Sapta-Sindhu (Sindhu-Sarasvati region of North and Northwest India). The Zoroastrians speak of mathra (Skt. Mantra) as utterances that accompany meditation. Like the Vedic tripartite division of society, the Zoroastrians have the classes priests (zaotar), warriors(nar) and pasturers (vaster).

Kashmiri folklore has many tales to share. It seems that the term daeva came into Kashmir late as a result of the immigration of Persians. It is equally possible that the term is there since ancient times and so as there in the Zoroastrian religion. For further support of this inter relation we can find that the Kashmiri Hindus, who have remained isolated from any Persian immigrations of the last few centuries, follow many practices that are prescribed for Zoroastrians. These include the sacred thread for women (called aetapan in Kashmiri). Both the religion has simplified the dichotomy of deva(good) verses asura(evil). The *asuras* are the ground on which the *devas* emerge. The Zarathushtrian reduction is not particularly different from the Puranic view. In this paper I have summarized the general structural and pronouncing similarities between the Zoroastrian and the Vedic systems. The Zoroastrian innovations on the prior Vedic system in Iran have parallels in the adaptations that were taking place in India in the Puranic period. The Zoroastrian innovations did not change the basic Vedic character of the culture in Iran. The worship ritual remained unchanged as was the case with basic conceptions related to divinity and the place of man. But the struggle between the Arya and the Dasyu in the Vedas is paralleled by one between the Arya and the Turya (Turks). Zarathustra nowhere names the daevas but Middle Iranian books label Indar(Indra), Nanhaithya (Nasatya) and Savol. These appear to be a personification of the acquisitive aspects of the devas. Vayu in the Zoroastrian view has two aspects, one good and another harmful. The good Indra, as Verethraghan (Vritrahan). So common deities and concepts make it clear that the Zoroastrian system is essentially the

same as the Vedic one. The devas are a part of the good forces in the Zoroastrian system under the label of yazata (yajatra, the adored ones). The names Ksatra Virya (Shahriyar) and Suvarnah (Khawarrah, Farrah) help find the logic of late Persian names. The daeva in modern Persian are known as *deev.* The commonality of the fire ritual is well known. So this system retained the earlier structure of the Vedic divinities and their relationship as well as the central role of the fire ritual. Herodotus states that the Persians built no temples, no alters, made no images or statues (Herodorus 1.131-2). Arrian in the Indica (7) says that Indians did not build temples for the gods. Thus to the outsider also, the two religions of the Persians and the Indians looked similar. Here in this paper evidences regarding the presence of the Indian religion in West Asia in the second millennium BC has been summarized. The old Vedic religion survived for a pretty long time in corners of Iran. The evidence of the survival of the devas comes from the daiva-inscription of Khshayarshan (Xerxes) (ruled 486-465 BC) in which the revolt by the *daiva* worshipers in West Iran is directly mentioned. Scholars generally take the use of *daiva* in the inscription as a misprint for *daeva.* Whether that is true or not, the inscription points to the presence of diverse beliefs within the region during the middle of the first millennium BC. In addition to that, the presence of the Mitanni does support the notion of the *daiva* worshipers to the West of the Iranians.

**Conclusion—**The extensive spread of the Vedic religion in Iran prior to Zarathushtra explains how the Zoroastrian reform left the basic system unchanged. The similarities are

well known also. The spread of the Indic system also explains how the Mitannis[4], connected to their Indic traditions. They were neighbours to the pre-Zoroastrian Iran and thus they should not be seen as an isolated group. It appears that due the collapse of the Sarasvati-river based economy around 1900 BC, made groups of Indians moved to West and that might have been responsible for the Aryanization of Iran, since it was not Aryanized earlier. This pastoral movement seems to be correlated with the presence of the Indic Kassites and the Mitannis in West Asia. This was not a process of intended invasions but rather a complex process with some migration and some cultural diffusion. The understanding of the Zoroastrian religion and the systematic comparison with the Vedic texts make it possible to consider the Sanskrit etymologies of the Avestan words.

**Foot Note**

1. Burrow, p.43
2. Philip Baldi (1983). An Introduction to the Indo- European Languages. Southern Illinois University Press. Pp. 51-52
3. Kak. Akhenaten. Surya. and the Rigveda 2003.
4. Kak. *op.cit*

**Select Bibliography**

M, Boyce. *A History of Zoroastrianism.* EJ. Brill. Leiden. 1975.

Burrow, T. *The Sanskrit Language.* Delhi. Motilai Banarsidass. 2001.

Feuerstein, George. Kak, Subhash and Frawley, David. *In Search of the Cradle of Civilization,* Delhi. MLBD, 1995 (1st Ed.)

Kazanas, N. The Rigveda and Indo-Europeans. *Annals of the Bhandarkar Oriental Research Institute.* 80:15-42.

Bryant. Edwin. *The Quest for the Origins of Vedic Culture: The Indo-Aryan Migration Debate.* Oxford University Press, 2001.

# किं इदमेव ज्योतिषम्?

## (फलकथनमेव ज्योतिषं न)

**Rajat Goutam Chhetri**
**Assistant Professor**
**Kavikulaguru Kalidas Sanskrit University,Ramtek**
**Email- rajatgoutam895@gmail.com**
**M.No- 9064476544**

**साङ्केतिकशब्दाः – ज्योतिषम्, वृष्टिः, पुनर्जन्म, द्रव्यराशिः,ईश्वरः।**

मार्गे गच्छन्तं कंश्चित् तिलकधारिणं पुरुषं दृष्ट्वा जनाः स्वहस्तं अग्रे कुर्वन्ति। चिन्तयति यत् पुरुषः हस्तं दृष्ट्वा भविष्यं ब्रविति। पण्डितं वा संस्कृतछात्रं दृष्ट्वा जनाः जन्माङ्गपत्रं प्रयच्छन्ति। किं वा वास्तविकं ज्योतिषं इदमेव वा? वस्तुतः ज्योतिषस्य एकं लघ्वङ्गं वर्तते फलादेशः। एतदतिरिच्य ज्योतिषे अनेकानि वैज्ञानिकानि तथ्यानि, तथा च अङ्गानि सन्ति। फलादेशं विहाय ज्योतिषे यानि विषयवस्तूनि सन्ति तानि अतिसंक्षिप्तेन प्रस्तूयतेऽत्र मया।

**मेघ सम्भवात् वृष्टिः**

मार्गशीर्षमासे चन्द्रः यदा पूर्वषाढानक्षत्रे भवति, कालेऽस्मिन् ये-ये मेघाः गगने परिदृश्यन्ते ते मेघाः तस्मात् नक्षत्रात् पञ्चनवत्युत्तरएकशतं(195) दिनानन्तरं तस्मिनेव नक्षत्रे यदा चन्द्रः प्रवेशति तदा ते वर्षन्ति[1]। एतेषां विस्तृतवर्णनं ज्योतिषस्य संहिता स्कन्धे उपलभ्यते।

[1]. क. चन्द्रो यद्धं गतो गर्भं कुर्यादावर्तनेऽष्टमे।
शतेऽह्नां पञ्च नव ते तद्धं गत्वा स वर्षति।।
ख. बृहत्संहिता, अध्याय 21, श्लो 06,07

**विश्वस्य सत्यता ज्योतिषे।**

कश्चित् एकः विद्वान् अस्ति सः वेदेषु पुराणादिषु यानि आख्यानानि उपलभ्यन्ते तानि सर्वाण्यपि आख्यानानि विश्वस्य एव सत्यस्थितिं वर्णयति इति ब्रविति। तदर्थं वेदः नित्यं शास्वतञ्चोच्यते। एकं पौराणिकं आख्यानं वर्तते यस्य सम्बन्धः खगोलीय पक्षेण सह वर्तते। तदित्थं दर्शयति-

**कामदेवस्य भस्म-**

भगवन्तं शिवं पार्वतीं प्रति प्रेमः जागृयात् इति धिया कामदेवः प्रयासं करोति। सन्दर्भेऽस्मिन् रुद्रः क्रोधेन नेत्रं उन्मीलयति। तस्मिन् कोपाग्नौ कामदेवः भस्म भवति। इदं पौराणिकं वर्णनं खगोलीय एका घटनायाः प्रतीकः विद्यते। खगोलस्य वर्णनं साधनादि सम्पूर्णविषयः ज्योतिषे अन्तर्भवति। अस्य आख्यानस्य खगोलीयरूपं इत्थं वर्तते।[2]

आद्रा नक्षत्रं अत्यन्तं देदीप्यमानं तथा रक्तवर्णनक्षत्रं वर्तते। अस्य वर्णनं पुराणादिष्वपि तथा आधुनिकविज्ञानेऽपि सत्यापितः वर्तते। भगवान् रुद्रः अस्य नक्षत्रस्य अधिपतिः अस्ति। कृष्णयजुर्वेदस्य नक्षत्रेष्टि इत्यत्र वचनमिदं उपलभ्यते। हस्तौ बाणयुतं अश्वे आरुढः इत्थं कामदेवस्य स्वरूपं पौराणिकग्रन्थेषु प्राप्यते। आकाशे नक्षत्रसमूहादुत्पन्नः धनुराशेः स्वरूपवर्णनमपि इत्थं वर्तते। आचार्यः वराहमिहिरः भणति हस्तौ बाणसंयुतं मनुष्यवत् पूर्वभागः तथा उत्तरार्धे अश्वस्य भागः धनुराशेः स्वरूपमस्तीति।

**चापि नरोश्व जघनो।**[3] राशिचक्रं भूमेः परितः भ्रमणं करोति। असौ चतुर्विंशतिहोरायाः (24) अन्तराले एकं चक्रं पूरयति। अस्मिन् चक्रे यः भागः पूर्वस्यां दिशि उदेति, अर्थात् पूर्वक्षितिजे लगति तल्लग्नमित्युच्यते। तस्मात् राशेः भागात् सप्तमराशिः तस्मिन् काले पश्चिम क्षितिजात् अधः गच्छति, अर्थात् अस्तं याति। आद्रा नक्षत्रं मिथुन राशेः मध्यभागे अस्ति। रुद्राधिपत्यं अलङ्कुर्वन् आद्रा नक्षत्रं यस्मिन् समये क्षितिजात् उपरि

---

[2] . The scriptures of the Vedas

[3] बृहज्जातकम् , रा.प्र.अ, श्लो.05

आगच्छति तस्मिन् एव समये सप्तमराशिः धनुः पश्चिमक्षितिजे अस्तं गच्छति। ज्योतिषे ये राशयः परस्परं सम्मुखे भवन्ति ते एकापरयोः सप्तमस्थाने भवन्ति। तस्मिन् स्थिताः ग्रहाः परस्परं पश्यन्ति।[4] अर्थात् उदितस्य आद्रानक्षत्रस्य दृष्टिः सप्तमे कामदेवस्वरूपवत् आकृतिर्प्राप्तौ धनुराशौ पतति तदा धनुराशिः अदृश्यं जायते। एवं आकाशीय धटनायाः प्रतिरूपं इदं पौराणिकमाख्यानं वर्तते।

**रेडियोधार्मिकता तथा द्रव्यराशिः।**

सृष्टौ प्रत्येकवस्तु उत्पन्नः भवति तथा विनष्टमपि याति। एषा प्रक्रिया एका श्रृङ्खलावती भवति। अर्थात् वस्तु उत्पन्नः भवति तत् क्रमशः विलयित सन् वायुरूपं धारयति। अस्मिन् क्रमे तत् ऊर्जा उत्पादयति। पूर्णवायुरूपं प्राप्तं तत् वस्तु कस्मिञ्चित् अन्तराले काले तत् पुनः तदेव पूर्वस्वरुपवस्तु दृष्यते। अस्य प्रमुखं उदाहरणम् अस्ति सूर्यः। सूर्यः प्रत्येकस्यां विधट्यां (per second) लक्षद्वयं विलयति तथा तस्यां एव मात्रायां विश्वे सौर ऊर्जा प्रसारयति। तया ऊर्जया एव विश्वं चलति। तदर्थं जगतः आत्मा सूर्यः इत्युक्तः।[5] कालक्रमे सूर्यः विलयन् सन् समाप्तं याति। एवञ्च अस्याः सृष्टेः अन्तः भविष्यति। परन्तु कस्मिन्चिदन्तराले पुनः तद् सूर्यरूपं धरति। अर्थात् पुन सृष्टिः प्रारम्भो भविष्यति। वैदिकसाहित्यं सृष्टिः तथा प्रलयं अस्मिन् विश्वसिति। तथा आधुनिकवर्णनमपि तस्मात् परं नास्ति।[6]

**तर्हि पुनर्जन्म किमर्थं न ?**

आधुनिकविज्ञानानुसारेण यदि सूर्यः समाप्त्यनन्तरं पुनः स्वरूपग्रहणं करोति चेत् प्रत्येकः प्राणिरपि इमां एव प्रक्रियां साधयेत्। विषयोऽयं स्वीकर्तुं सन्देहः न स्यात्। **वासांसि जीर्णानि यथा विहाय** इत्यादि वचनानि स्वीकर्तुं वैज्ञानिकान् संकोचः न भवेत्। यदि उपरोक्ताः सिद्धान्ताः सत्यमस्ति चेत् कर्मसिद्धान्तः, पूर्वजन्मसिद्धान्तमपि

[4] पश्यन्ति सप्तमं सर्वे...,लघुपाराशरी,श्लोक 05

[5]आत्मारविः शीतकरस्तु चेतः...,लघुजातकम्

[6] The mysterious Universe अध्याय3, पृ.54-94

तावदेव वैज्ञानिकं सत्यञ्च अस्ति। एवञ्च कर्मसिद्धान्ताधारितज्योतिषमपि वैज्ञानिकमेव अस्ति।

**स्वर्गनरकपुण्यपापानामेतेषां सर्वेषामपि कर्मणा सह समबन्धः**

कर्म द्विविधं पुण्यकर्म पापकर्म च। उभावपि कर्मणी यतावत् संचितौ भवतः। पापकर्मवशात् पापकर्म पुणकर्मवशात् पुण्यकर्म संचीयते। तानि कर्माण्यनुगुणं प्राणिः स्वर्गं नरकञ्च प्राप्नोति। कर्मफलभोगानन्तरं पुनः मर्त्यलोके जन्म प्राप्नोति। वस्तुतः प्राणिः कुत्रापि दण्डं न भुञ्जति। अयं कालः नष्टशरीरस्य पुनः शरीररूपग्रहणकालः वर्तते।

अवध्यनन्तरं जन्मप्राप्तः जातकस्य जन्मसमये या ग्रहाणां स्थितिः भवति सा स्थितिः तस्य कोशे विद्यमान पुण्यपापाधारेण भवति। अतः ग्रहाणां स्थित्याधारेण इदं स्पष्टं भवति यत् जातकः पुण्यकर्मवषशात् तदनुरूपं सुखं भुञ्जति तथा च पापकर्मवशात् तदनुरूपं दुखं कष्टञ्च भुञ्जति। यदा कोशे पुण्यपापे शून्ये भवतः तदा प्राणिः मोक्षं प्राप्नोति।

**ईश्वरस्य विद्यमानता स्थानम्** –

देवालयस्य निर्माणं तथा मूर्तेः स्वरुपम्, आकाशादिनां निर्णयः वास्तुशास्त्रस्य एकः भागः अस्ति। वास्तु संहिता स्कन्धस्य एकः अभिन्नाङ्गः वर्तते। देवालयस्य आवश्यकतायाः सन्दर्भे भगवतः स्थानस्य वर्णनं लभ्यते। उद्यानं सरोवरः तडागः गिरिः इत्यादिस्थानेषु भगवान् विचरणं करोति। एतानि स्थानानि प्राकृतिकं अपि भवितुं शक्नोति कृत्रिममपि।

**कालसाधनम्**-

विश्वस्य अत्यन्तं प्राचीनं साहित्यं वेद एव अस्ति। लक्षवर्षपूर्वस्य शिलानां अभिलेखानां अवशेषाणां कालनिर्धारणे समर्थः आधुनिकविज्ञानं वेदस्य कालनिर्धारणे

असमर्थः अस्ति केवलं अनुमानमेव कर्तुं समर्थः अस्ति आधुनिकविज्ञानम्। अस्य अनेकानि कारणानि सन्ति यस्य अत्र चर्चा सन्दर्भे नास्ति।

वेदः अपौरुषेयः अस्ति। नित्यं शास्वतञ्च वर्तते। अस्य विज्ञानत्वं इति प्रतिपादयितुं आवश्यकता नास्ति। यदि अविज्ञानं इति कथयितुं इच्छा अस्ति चेत् शोधः कर्तुं शक्यः। शोधस्य निष्कर्षः अयमेव भवति यत् वयं यं स्तरं वेदं मन्यामहे तस्मात् लक्षाधिकं गुणं वैदिकविज्ञास्य स्थापनं भवति। अत्र अतिशयोक्तिः नास्ति। अस्य समर्थनस्य अनेकाः तथ्या सन्ति।

कालः मानवजीवनस्य एकः अभिन्नः धटकः वर्तते। कालसाधनं लोकोपकारकस्य मानवकल्याणस्य च प्रथमः उपकरणः अस्ति। वैदिकसाहित्ये निर्दिष्टानामनेकानां मानवकल्याणकारककार्याणां सम्पादनं कालेन सह वर्तते। कालः निर्दोषः न भवति। अस्य कश्चित् खण्डः दोषयुक्तः अस्ति कश्चित् खण्डः निर्दोषः अस्ति। निर्दोषकालः कार्याणां सम्पादने तथा च अपेक्षितानां फलानां साधने साहायकः सिद्धः भवति।अमुमेव निर्दोषकालं महूर्तकालः इति व्यवह्रयते अस्माभिः। कालस्य दोषराहित्यमपि समयः कालः स्थानभेदेन भिन्नप्रकारः भवति।

अनेन विचारेण स्पष्टं यत् कालः एकः अनिवार्यः साध्यः घटकः अस्ति यस्याभावेन विश्वः शून्यं परिलक्ष्यते। कालसाधनाय विविधगणितप्रक्रियायाः आवश्यकं भवति।भारते गणितस्य आविष्कारः अस्यामेव विन्दौ अभवत्। वैदिकसाहित्ये गणितस्य स्थानं दृष्ट्वा इदं सिद्धं यत् गणितं भारते एव जन्मप्राप्तम्। पाश्चात्यवैज्ञानिकस्य जेम्स जीन्स महोदयस्य वचनं "**विश्वस्य संरचनायां सूक्ष्मदृष्ट्या पश्यामश्चेत् ब्रह्मा महान् गणितज्ञः भाति**"**।**"कालसाधनाय सिद्धान्तभागः अस्ति यः स्वस्मिन् महान् विज्ञानं अस्ति।

**स्वरः एवं युद्धम्**

प्रक्षेपणशस्त्राणां निर्माणं प्रत्येकं राष्ट्रं करोति। अस्य मुख्योद्देश्यं वर्तते राष्ट्रस्य सुरक्षा। रसायनयुद्धस्य अपि नाम सततं श्रूयतेऽस्माभिः। बीजादिषु अनेकान् विकारान् उत्पाद्य शत्रु राज्यानां उपजशक्तिं नाशकर्तुं प्रयासः अपि एकं युध्दवत् एव अस्ति।

बृहत्संहितायां आचार्यः वराहमिहिरः दैवज्ञलक्षणानां वर्णनक्रमे लिखति यत् यः राजा दैवज्ञान् स्वराज्ये स्वमण्डले स्थानं न ददाति सः राजा अन्धवत् मार्गे भ्रमति। अर्थात् राजानं मार्गदर्शनकार्यमपि दैवज्ञानामेव अस्ति। सन्दर्भेऽस्मिन् ध्यानेन अध्ययनयोग्यः अंशः स्वरशास्त्रं वर्तते। स्वरशास्त्रं संहिता स्कन्धस्य एव एकं अङ्गं वर्तते। स्वरशास्त्रे शत्रुविजयस्य सम्बन्धीनि सर्वाण्यपि विषयाणि प्रतिपादितानि सन्ति। भागोऽयं अत्यन्तं रोचकं तथा च शोध्यः वर्तते। अस्य अनेकानि उपाङ्गानि सन्ति यः युद्धनीतीनां अनेकस्वरुपाणां वर्णनं करोति। राजा भोजस्य विषये सर्वे जानन्त्येव। राज्ञा भोजेन समरसारः नामकः ग्रन्थः लिखितः। इतिहासस्यानुसारेण राजाभोजः युद्धक्षेत्रस्य रणनीतौ निपुणः आसीत्। सम्पुर्णः अयं विषयः ज्योतिषस्य एव एकं अङ्गं वर्तते।

**निष्कर्षः**

एवं विचारिते सति इदं अवगम्यते यत् शास्रं किमपि वा तस्य उपाङ्गं किमपि वा भवतु तत् सर्वं ज्योतिषशास्त्रात् परं नास्ति। किन्तु राजनैतिकपरिस्थितावशात् विगतेषु 1500 वर्षेषु भारतस्य विज्ञानं अधिकांशतः मानवजीवनात् दूरं गतः एवं यत् अवशिष्टं तत् अध्ययनस्य प्रसारस्य शोधस्य च अभावेन केवलं व्यापारस्य एकः स्रोतः एव भूत्वा अवतिष्ठति।

श्री बालगङ्गाधरतिलकः माहाभागः न वैदिकः आसीत् न तु ज्यौतिषिकः। परञ्च परिस्थितिप्रभावकारणात् सः वौदिकविज्ञानस्य सारं अज्ञासीत् एव ज्योतिषग्रन्थानां अध्ययनं अकार्षित्। भगवद्गीतायाः वचनेन प्रेरितः सन् सः अध्ययनं अकरोत्। एव तस्य यत् किमपि वचनं तस्य ग्रन्थे प्राप्यते तत् सर्वमपि आधुनिककालस्य वैदिकसाहित्यसन्दर्भस्य एकमेव प्रमाणं अस्ति। तिलकमहोदस्य विचारानन्तरं अस्मिन् मार्गे कश्चनः तादृशः शोधः एतावता न जातम्।

वास्तविकअध्ययनाय वैद्यशास्त्रस्य मार्गे अस्माभिर्गन्तव्यः। ज्योतिषशास्त्रस्य विभिन्नभागान् स्वतन्त्रभागत्वेन घोषणियः भवति तथा च स्वस्वरुच्यानुसारेण तद्तद् भागेषु अस्माभिर्अध्येतव्यः। अद्यत्वेऽस्मिन् विश्ववैश्विकरणयुगे यदि कश्चित् ज्योतिषस्य प्रत्येकभागान् जिज्ञासति चेत् तत् तु असम्भवः वर्तते।

## सन्दर्भग्रन्थसूची-


1.आचार्यवराहमिहिरकृतबृहत्संहिता,चौखम्बा पब्लिकेशन,2011

2.नरपतिकृतनरपतिजयचर्यस्वरोदय,चौखम्बा विद्याभवन,2015

3.आचार्यवराहमिहिरकृतलघुजातकम्,चौखम्बा विद्याभवन,2017

4.आचार्यवराहमिहिरकृतबृहज्जातकम्, चौखम्बा विद्याभवन,2019

5.लघुपाराशरी,चौखम्बा सुरभारती प्रकाशन, 2005

6.James Jeans, The Mysterious Universe, Cambridge University Press, New York

7. The Scriptures of the Vedas, Potti Sreeramulu telegu University, Telangana,2013

8. श्रीमद्भगवद्गीता,गीताप्रेस गोरखपुर,2018

9. Bal Gangadhar Tikal,Orion An Antiquity of vedas,2021

# कैवल्य और मोक्ष का तुलनात्मक अध्ययन

डॉ. रोहित तळवलकर

**प्रस्तावना**

स्वयं को जानो यही सभी संतो और ऋषियो का संदेश है । जीवन दुखो से भरा है और जीवन का उद्देश्य ही आत्मज्ञान है ।

विभिन्न दार्शनिक प्रणालियों में अलग-अलग लक्ष्य होते हैं

निर्वाण बौद्ध धर्म में, मोक्ष जैन धर्म में है और कैवल्य योग प्रणाली में हैं ।

जो जाग रहा है, उसके लिए रात लंबी है ।

जो थक गया है उसके लिए दूरी लंबी है ।

जन्म-मरण का नियम न जानने के कारण मूर्खों के लिए यह चक्र लंबा होता है। (१)

पतंजलि और महावीर की शिक्षाएं आज भी उपयोगी हैं

कैवल्य और मोक्ष की तुलना अभी तक नहीं हुई है।

दो धार्मिक परंपराओं के बीच सामान्य विशेषता के कारण तुलना के लिए पर्याप्त गुंजाइश है । यह पत्र कैवल्य और मोक्ष के बीच समानता और मतभेद का अध्ययन करने का एक छोटा सा प्रयास है।

**पतंजलि योग और जैन धर्म**

पतंजलि और महावीर की शिक्षाएं भारत में फली-फूलीं ।

उनके अनुसार अज्ञान दुख का मूल कारण है और इस जीवन का उद्देश्य आत्मज्ञान है।

मुक्ति के मार्ग में आध्यात्मिक गुरु की अहम भूमिका होती है

योग और जैन धर्म में सिद्धांत और व्यवहार समान रूप से महत्वपूर्ण हैं

. “सांख्य दर्शन के सैद्धान्तिक आदर्शों की प्राप्ति का व्यावहारिक मार्ग है योग।

जाहिर है, वे सर्व दुक्ख की शिक्षा के कारण निराशावादी हैं

लेकिन मूल रूप से वे आशावादी हैं क्योंकि दुख से मुक्ति का मार्ग है ।

ध्यान की मदद से वास्तविकता को देखा जा सकता है।

**कैवल्य**

पतंजलि-योग प्रणाली में, लक्ष्य कैवल्य है। पुरुष (स्व) हमेशा स्वतंत्र है; लेकिन

अज्ञान के कारण स्वयं को शरीर और मन से पहचानता है और पीड़ा का अनुभव करता है। परंतु जब विवेक ज्ञान प्रकट होता है, तो वह पुरुष और प्रकृति के बीच भेद कर सकता है। केवल इस अवस्था में (केवल) स्वयं (पुरुष) रहता है; इसलिए इस अवस्था को कैवल्य कहा जाता है ।

जब बुद्धि सत्त्व और पुरुष के बीच उनकी पवित्रता में समानता स्थापित हो जाती है, तो कैवल्य होता है । (२)

मुक्ति लाने के लिए यह पर्याप्त नहीं है कि पुरुष और बुद्धि को अलग करने वाला सच्चा ज्ञान उत्पन्न हो; लेकिन यह आवश्यक है कि बुद्धि के अनुभव की सभी पुरानी आदतें, उसके सभी स्वभाव (संस्कार) एक बार और सभी के लिए नष्ट हो जाएं, फिर कभी पुनर्जीवित न हों।

**मोक्ष**

यदि कोई पक्षी लंबे समय तक पिंजरे में रहता है और उसे मौका मिलता है तो वह पिंजरे को छोड़कर हवा में उड़ जाता है; और फिर कभी पिंजरे में नहीं आता। इसी तरह जब आत्मा अपने पिछले कर्मों के स्वभाव से मुक्त हो जाती है, तो उसे कभी भी जन्म और मृत्यु के चक्र का अनुभव नहीं होगा। स्वयं की प्रकृति का मुक्त भोग सभी अशुद्ध मानसिक अवस्थाओं, अर्थात् सभी आसक्तियों, घृणा और सभी योगों की समाप्ति के परिणामस्वरूप होता है।

जब जीव अजीव से मुक्त होता है वो अवस्था को मोक्ष कहा जाता है। मोक्ष है कि इसमें सभी इच्छाओं का अभाव और प्राकृतिक संतोष का उदय शामिल है।

वह ज्ञान जो चीजों की प्रकृति को प्रकट करता है जैसा कि वे वास्तव में हैं, न तो अपर्याप्त हैं और न ही अतिशयोक्ति के साथ, न लंबे और न ही छोटे; लेकिन सटीकता और निश्चितता के साथ सही ज्ञान कहा जाता है।

जो ज्ञान आत्म प्राप्ति का कारण है वह सम्यक ज्ञान है। मोक्ष की ओर ले जाने वाला ज्ञान सर्वोत्तम ज्ञान है। संसार के सभी दुख स्वयं की अज्ञानता के कारण हैं और यह अज्ञान सम्यक ज्ञान, विश्वास (दर्शन) आचरण (चरित्र) और तप (तप) से नष्ट हो जाता है। ये मिलकर मोक्षमार्ग का निर्माण करते हैं। यह सर्वोच्च ज्ञान है जो व्यक्ति को अपने स्वभाव का एहसास कराता है।

**कैवल्य और मोक्ष के बीच समानताएं**

1) कैवल्य और मोक्ष में जन्म और मृत्यु का चक्र समाप्त हो जाता है।

2) कैवल्य और मोक्ष में स्वयं अपने स्वरूप का बोध होता है।

.

3) कैवल्य और मोक्ष दोनों में संस्कार नष्ट हो जाते हैं। नेक मार्ग पर चलकर कैवल्य और मोक्ष प्राप्त किया जा सकता है।

4) कैवल्य और मोक्ष शून्यता की स्थिति नहीं हैं

.

5) कोई इसी जीवन में मोक्ष और कैवल्य का अनुभव कर सकता है; और मृत्यु के बाद नहीं।

6) मोक्ष और कैवल्य की प्राप्ति के लिए प्रज्ञा का बहुत महत्व है।

.

**कैवल्य और मोक्ष के बीच मतभेद**

1.भगवान की सहायता से भी व्यक्ति कैवल्य प्राप्त कर सकता है। (३) लेकिन जैन धर्म में व्यक्ति स्वयं के प्रयास से मोक्ष प्राप्त कर सकता है, और भगवान की कृपा की आवश्यकता नहीं है ।

२ जैन धर्म में बंधन और मुक्ति वास्तविक है।

बंधन और उसके कारणों की अनुपस्थिति से उत्पन्न पूर्ण आध्यात्मिक विकास को मोक्ष कहा जाता है।

लेकिन योग प्रणाली में बंधन और आत्मा की मुक्ति काल्पनिक है।

3. जैन दर्शन में कोई धर्ममेघसमाधि नहीं है । जिसने कैवल्य प्राप्त किया है धर्ममेघसमाधि का अनुभव करता है । (४)

4. योग का उद्देश्य चित्तवृत्ति निरोध है (५) । लेकिन जैन दर्शन में चित्तनिरोध स्थिती दिखाई देती है ।

**निष्कर्ष:**

पतंजलि और महावीर की शिक्षा आज भी समान रूप से उपयोगी है। ऐसा नहीं है कि वास्तविकता एक है और पतंजलि के लिए यह कैवल्य है और महावीर के लिए यह मोक्ष है। ऐसा नहीं है कि एक वास्तविकता को विद्वान लोग विभिन्न नामों से जानते हैं। (६) हंस सफेद है और बगुला सफेद है लेकिन हंस पानी और दूध में मतभेद कर सकता है लेकिन बगुला नहीं कर सकता। जिस प्रकार एक मतभेद के कारण बगुला हंस नहीं है, (७) वैसे ही हम निर्वाण और मोक्ष के बीच स्पष्ट समानताएं पाते हैं, दोनों के बीच महत्वपूर्ण मतभेद हैं। तो कैवल्य और मोक्ष एक ही नहीं बल्कि पूरी तरह से अलग लक्ष्य हैं ।

**संदर्भ**


१) दीघा जागरतो रत्ति
दीघम संतस्स योजनं

दीघो बालानं संसारो

सद्धम्मं अविजानतं। धम्मपद ५/६०

२) सत्त्व पुरुषो साम्ये कैवल्यं । योगसूत्र ३/५५

३) ईश्वर प्रणिधानाद वा । योगसूत्र १/२३

४) प्रसंख्याने 'प्य कुसिदस्य सर्वथा विवेकख्याते धर्ममेघ समाधि: । योगसूत्र ४/२९

५) योगाश्चित्तवृत्ति निरोधः । योगसूत्र १/२

६ एकं सत विप्रा: बहुधा वदन्ति । ऋग्वेद १. १६४. ४६

७) हंस श्वेतः बकः श्वेतः को बक भेदो हंसयो नीरक्षीर विवेकेतु हंसो हंसो बकोबकः । जाधव जे. जी (१९९८) संस्कृत सुभाषिते , मनोविकास प्रकाशन, मुंबई पृ १८

# नैषधीयचरितमहाकाव्ये दार्शनिकतत्त्वानां सोहाहरणं समन्वयः

**देवसुजनमुखार्जी**
अध्यापकः (SACT), संस्कृतविभागः
कालियागञ्ज-महाविद्यालयः, उत्तरदिनाजपुरम्, पश्चिमवङ्गः

**प्रबन्धसारः**

दर्शनमवलम्ब्य विश्वस्य सर्वे दार्शनिकाः यथा स्वकीयसाहित्यसाधनायां निमग्नाः भवन्ति तथैव भारतीयसाहित्यसाधनायां दार्शनिकचिन्तनस्य विशिष्टमेकं स्थानमस्ति। भारतीयदार्शनिकचिन्तनस्य प्रभावः सर्वत्र परिलक्ष्यते, यथा – व्याकरणशास्त्रे, स्मृतिशास्त्रे, पुराणे, अलंकारशास्त्रे, संस्कृतकाव्ये संस्कृतनाटके च। नैषधीयचरितमहाकाव्यकारकः श्रीहर्षः न केवलं महाकविः अपितु विचक्षणदार्शनिकरूपेण सुविदितः। वेदान्तदर्शनमवलम्ब्य तेन कृतं खण्डनखण्डखाद्यमिति मूल्यवान् अद्वैतवेदान्तमूलकग्रन्थः। प्रतिपक्षिणः दार्शनिकसम्प्रदायानां सिद्धान्तान्त खण्डनपुरस्सरं श्रीहर्षेण विरचितः ग्रन्थोरयं तीक्ष्णास्त्रस्वरूपः। काव्यजगति दर्शनजगति च तस्य अबाधपदसञ्चारेण सर्वे विस्मिताः। महाकवेः नैषधचरितमहाकाव्ये दार्शनिकप्रज्ञायाः तथा कविप्रतिबायाः यः अपूर्वः समन्वयः साधितः सः अन्यत्र दुर्लभोऽस्ति। श्रीहर्षः सयत्नप्रयासपूर्वकं तस्य महाकाव्ये दुरुहदार्शनिकतत्त्वानि अवतरितवान्।

**कुञ्चिकाशब्दाः**

*दर्शनम्, न्यायदर्शनम्, मीमांसादर्शनम्, सांख्यदर्शनम्, नैषधीयचरितम्, श्रीहर्षः, मोक्षः।*

धर्मार्थकाममोक्षैर्लिप्तानामस्माकं भारतीयानां दर्शनस्य तत्त्वानि अतिमनोहराणि जीवनप्रदायकानि मोक्षसाधकानि च सन्तीति निश्चप्रचम्। रुधिरेण दर्शनेन च विना भारतीयानां स्थितिः न शक्यते इति आबहोः कालात् ते स्वप्रतिभया स्वजीवनेन स्वचिन्तनेन मोक्षसाधकं दर्शनं परिपोषयन्तः वैश्विकस्तरे दर्शनस्य सम्प्रसारणाय भारतीया अग्रगामिणो राराजन्ते। भारतीयदर्शनपरम्परायाः इदमैतिह्यम् प्रचीनकालादेव विविधैः प्रकारैः विविधेषु क्षेत्रेषु प्रतिफलितं दृश्यते। अत एव अस्य प्रतिफलनं महाकविभिर्विरचितेषु काव्येषु नासीदिति असम्भवम्। अपि तु, एवं वक्तुं शक्यते विविधेषु महाकाव्येषु नाटकेषु रूपकेषु दर्शनस्य प्रभावस्तर एवमासीद्यद् मम्मटाचार्येण काव्यलक्षणेषु सद्यः परनिर्वृत्तये इति लिखितम्।

काव्येन एव ब्रह्मानन्दसहोदररूपस्य रसस्य स्थितिर्भवति। येन नास्तिका अपि ब्रह्मानन्दं लभेयुः।

आदौ आलोचनीयं यत् दर्शनं नाम किमिति। दृश्यतेऽनेन इति दर्शनम्। दृश्यतेऽनेन परमं तत्त्वमिति दर्शनम्। व्युत्पत्तिमार्गेण दर्शनशब्दस्य अर्थं पश्यामश्चेत् अर्थः स्यात् – येन माध्यमेन साधनेन वा इदं विश्वम्, इदं वस्तुजातम्, जीवात्मा, परमात्मा, अन्तरात्मा, प्रकृतिश्च दृश्यन्ते तद् दर्शनम् इति।

एवं संस्कृतवाङ्मये विद्यमानेषु प्रसिद्धकाव्येषु अन्यतमं महाकाव्यं भवति नैषधीयचरितम्। महाकविना श्रीहर्षेण द्वाविंशतिसर्गात्मकेऽस्मिन् महाकाव्ये न केवलं महाभारतमाश्रित्य कथां विरचयामास अपि तु अत्र विद्यमानानां दार्शनिकतत्त्वानां समावेशः सहृदयानां मनांसि नितरां हृष्टीकरोति। कथं वा तस्य काव्ये दार्शनिकतत्त्वानामन्वयो न स्यात्, यतः श्रीहर्षः खण्डनखण्डखाद्यम् इत्याख्यम् अद्वैतवेदान्तसम्बद्धं ग्रन्थं विरच्य दार्शनिकतां स्वान्तर्गतां प्रकटयामास। वस्तुतः काव्यजगति दर्शनजगति च तस्य अबाधपदसञ्चारेण सर्वे विस्मिताः। महाकवेः नैषधचरितमहाकाव्ये दार्शनिकप्रज्ञायाः तथा कविप्रतिभायाः यः अपूर्वः समन्वयः साधितः सः अन्यत्र दुर्लभोऽस्ति। श्रीहर्षः सयत्नं प्रयासपूर्वकं तस्य महाकाव्ये दुरूहदार्शनिकतत्त्वानि अवतरितवान्। नैषधचरितमहाकाव्ये कोमलकान्तपदानां सन्निवेशः कालिदासरचनायाः सुकुमारता यद्यपि नास्ति तथापि क्वचित् ललितमधुरशब्दविन्यासस्य अनुप्रासालंकारस्य च स्वच्छन्दप्रयोगचातुर्येण महाकाव्ये पदलालित्यं सृष्टम्। श्रीहर्षरचनायां श्रुतिमाधुर्यार्थं तथा सङ्गीतमयतार्थं प्रवादोऽयं प्रचलितोऽस्ति यत् - **'नैषधे पदलालित्यम्'** इति। पदलालित्येन समृद्धस्य दार्शनिकप्रज्ञाप्रदीप्तालोके उद्भासितस्य महाकवेः श्रीहर्षस्य वाङ्मनिर्माणे दार्शनिकतत्त्वोपस्थापनपटुत्वं तस्य याथार्थ्यत्वं च विश्लेषणसापेक्षमस्ति।

**नैषधीयचरितमहाकाव्ये प्रतिफलिततत्त्वानि**

नैषधमहाकाव्यं दुरूहानां दार्शनिकत्त्वानामिव सामान्यत्त्वानामपि वाहकमस्तीति निमित्तं मोक्षप्रतिपादकतत्त्वानामिव न्यायवैशेषिकसामान्यत्त्वानामपि चित्रणं उपमानरूपेण बहुत्र स्थले महाकविना उपन्यस्तम्। तथा हि अत्र परमाणुविचारः, कार्यकारणभावः, अनुमितिः, प्रमाप्रमयोर्भेदः, इन्द्रियाणामुद्देशः, षोडशपदार्थानामुल्लेखः, तमःस्वरूपं, हेत्वाभास इत्यादयो विषया यथा वर्णिताः तथैव न्यायनये मुक्तिरपि तेन उल्लिखिता। यद्यपि न्यायनये मुक्तितत्त्वानां निन्दा एव तेन विहिता तथापि तस्य अत्र सन्निवेशो कृतो वर्तते। न्यायतत्त्वानि

अधिकतया अत्र दृश्यन्ते इति हेतोः तेषां पूर्वमुल्लेखं कृत्वा तदनु अत्र दृष्टानां मीमांसादर्शनतत्त्वानामुल्लेखोऽवश्यं विधेय एव। तथाहि अत्र मीमांसातत्त्वेषु देवतास्वरूपम्, ईश्वरस्य जगन्नियामकत्वं, ज्ञानस्य स्वतःप्रामाण्यम् इत्यादयो विषया आलोचिता।

पूर्वमेव प्रबन्धेऽस्मिन्नुल्लिखितं यत् महाकविः श्रीहर्षः खण्डनखण्डखाद्याख्यस्य वेदान्तग्रन्थस्य प्रणयनं चकार इति। अत एव वेदान्तदर्शनतत्त्वानि तद्धृदयाधिगतानि इति निरबाधतया शक्यवचम्। तेन महाकाव्यमिदं वेदान्तदर्शनच्छायया स्निग्धतां एति। अत्र प्रतिपादितेषु वेदान्ततत्त्वेषु तावत् मुख्यतया राजमाना विषया हि – ब्रह्मस्वरूपं, मुक्तेरानन्दमयत्वं, स्वप्नतत्त्वम्, लिङ्गशरीरे आमुक्ति स्थितिः, विप्रतिपत्तिचतुष्टयम्, जगत्प्रपञ्जस्य ब्रह्मणि पर्यवसानम् इत्यादयः।

तथैव अत्र सांख्यदर्शनस्थस्य सत्कार्यवादस्य छाया अपि वर्तते। योगशास्त्रीया सम्प्रज्ञातसमाधिः, बोद्धदर्शनस्य शून्यवादः, क्षणभङ्गवादः, विज्ञानवादः, सौत्रान्तिकवैभाषिकमतानामुल्लेखः इत्यादीनाम् उल्लेखो वर्तते। एतद्विहायापि जैनचार्वाकादीनां मतान्यपि अत्र दृश्यन्ते। एतेषाम् उपर्युक्तानां व्याख्यानं लघुना प्रबन्धेन अधः क्रियते।

- **परमाणुवादः**

क्षित्यप्तेजवायूनां चतूर्णां भौतिकद्रव्यानामन्त्यावयवरूपपदार्थविशेषः परमाणुः न्यायवैशेषिकदर्शने विशिष्टमेकं स्थानं अधिकरोति। जागतिकपदार्थसृष्टेः मौलिकोपादानं परमाणुः अतीन्द्रियः। परमाणोः द्व्यणुकस्य च अणुपरिमाणत्वं तथा अतीन्द्रियत्वं न्यायवैशेषिकदर्शनसम्मतम्। पक्षान्तरे त्र्यणुकं किन्तु इन्द्रियग्राह्यम्। परमाणुकारणतावादः अपूर्वदक्षतया महाकविश्रीहर्षेण स्वकीये नैषधचरितमहाकाव्ये उपस्थापितः। निषधाधिपतेः नलस्य सौन्दर्यवर्णनासंदर्भे महाकवेः लेखनीप्रसूते **अन्योऽन्यसङ्गमवशादधुना** इत्यादिश्लोके एकस्य द्व्यणुकस्य संरचनार्थं सर्वादौ द्वौ परमाणू प्रवृत्तौ स्तः। अनुरूपतया मदनदेवस्य भस्मीभूतदेहस्य पुनःसृष्ट्यर्थं नलदमयन्त्योः विलासप्राप्तं मनसी परस्परं मिलित्वा शोभां लभेतामिति श्लोकार्थः। नलदमयन्त्योः द्वे मनसी परमाणुद्वयवत् परस्परं मिलिते तथा द्व्यणुकरूपेण प्रतिभासिते सती हरकोपानलेन भस्मीभूतस्य कामदेवदेहस्य पुनः नूतनरूपेण विनिर्माणं कुरुताम् इति अभिप्रायः। **वयप्रकर्षाध्यनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः** इति श्लोके नलाश्वस्य गतिवेगवर्णनाप्रसङ्गे श्रीहर्षः मनुष्यानां मनः अणुपरिमाणत्वेन

अवर्णयत्। अश्ववेगस्यातिशय्यवशात् उत्थितानां धूलिराशीनामणुपरिमाणत्वं मनुष्यानां मनःसदृशम्।

नैयायिकैः अभिमन्यते यत् योगिनः परमाणोः प्रत्यक्षार्हाः सन्ति। परमाणोः इदं योगप्रत्यक्षगोचरत्वं श्रीहर्षरचनायां **यत्पथावधिरणुः परमः सा** इत्यादिश्लोके प्रतिफलितम्। परमाणुः यत्पथाऽवधिः, तादृशी योगिधीः तरुण्या दमयन्त्या स्वचित्तपरमाणौ लज्जागुहागतसिंहीकृतमेनं युवानम्। यस्मात् नो विलोकयतीति भावः। योगिभिः असाधारणशक्त्या परमाणुः प्रत्यक्षीक्रियते चेदपि तेषां दृष्टिः दमयन्त्याः चित्तपरमाणोः गहने शयितं मध्यमपरिमाणं नलं प्रत्यक्षयितुं न समर्थाः सन्ति। श्लोकेऽस्मिन् परमाणुसमूहानां योगिप्रत्यक्षगोचरत्वमुल्लिख्य महाकविश्रीहर्षेण कविप्रतिभादार्शनिकप्रज्ञयोः अपूर्वः समन्वयः साधितः।

- **कार्यकारणभावः**

कार्यकारणभावरूपः विषयः सर्वैः दार्शनिकैः अङ्गीक्रियते एव। तर्कसंग्रहे अस्ति - **कार्यनियतपूर्ववृत्तिकारणम्।**[1] अर्थात् कार्यस्य नियतपूर्ववृत्तित्वमेव कारणमिति। कारणाभावे कार्याभावः संभवति। वैशेषिकसूत्रे अस्ति - **कारणभावात् कार्य्यभावः।**[2] अर्थात् कारणसद्भावमेव कार्यम्। कारणस्य इदं कार्यनियतपूर्ववृत्तित्वं प्रासङ्गिकतया श्रीहर्षकाव्ये उल्लिखितम्। नैषधीयचरितस्य चतुर्थसर्गस्य **ध्रुवमधीतवतीयमधीरताम्** इत्यादिश्लोके दमयन्त्याः पूर्वरागवर्णनाप्रसङ्गे श्लोकोऽयमवतारितः। अतिकृशोदरी दमयन्तीयं स्त्रीमर्यादाविरोधहेतुमवस्थानविरोधकारणं च चपलतां प्रियदूतपक्षिगमनवेगात् गृहीतवती। यतः यः जनः यत्सन्निहितः सः तदुत्पन्नः इति श्लोकार्थः। कारणगुणैः कार्ये ये गुणाः उत्पद्यन्ते, ते गुणाः कारणगुणपूर्वकाः सन्ति। कार्यगुणः कारणगुणपूर्विकोऽस्ति। यथा कारणे रूपादीनां सद्भावोऽस्ति चेत् कार्ये अपि रूपादीनामुपस्थितिः भवेत्। महाकविश्रीहर्षस्य रचनायां न्यायवैशेषिकदर्शनस्य सिद्धान्तोऽयं प्रतिभासितः। नलगुणानां वर्णनाप्रसङ्गे कविः उक्तवान् -

**यशो यदस्यजनि संयुगेषु कण्डूलभावं भजता भुजेन।**
**हेतोर्गुणादेव दिगापगाली कूलङ्कषत्वं व्यसनं तदीयम्॥**[3]

---

[1] तर्कसंग्रहः – ३१
[2] वैशेषिकसूत्रम् – ४/१/३
[3] नैषधीयचरितम् – ३/३९

युद्धेषु कण्डुलभावं प्राप्नुवता नलस्य बाहुना या कीर्तिः अजनि। तदीयं काष्टानदीराजितटवर्षकत्वं व्यसनं कारणस्य भुजस्य कण्डूलत्वरूपगुणादेव आगतमिति श्लोकतात्पर्यम्।

- **अनुमितिः**

अनुमितिः नैयायिकानां प्रसिद्धतमो विषयः। नैयायिकाः प्रत्यक्षेण प्रमितं विषयम् अनुमानेन साधयितुमिच्छन्ति। कामपीडितायाः दमयन्त्याः अवस्थावर्णनप्रसङ्गे कविना उक्तम् -

**उदयति स्म तदद्भूतमालिभि र्धरणीभृद्भुवि तत्र विमृश्य यत्।**
**अनुमितोऽपि च वाष्पनिरीक्षणाद् व्यभिचचार न तापकरोऽनलः॥**[4]

यथा पर्वतभूमौ व्याप्तिमनुसन्धाय धूमदर्शनात् अनुमितोऽपि तापकरः अग्निः इति निश्चयज्ञानं बभूव। तथैव सखीभिः तस्यां राजपुत्र्यां विचार्य अश्रुलिङ्गदर्शनात् अनुमितोऽप सन्तापजनकः नलः इति निश्चयज्ञानं बभूव इति श्लोकार्थः।

- **प्रमाप्रमयोर्भेदः**

न्यायवैशेषिकानां मते ज्ञानं द्विविधम्, यथा – प्रमा अप्रमा चेति। श्रीहर्षेण एकस्मिन् श्लोके प्रमित्यप्रमित्योः द्विविधज्ञानयोः उल्लेखनं कृतम्। यथा -

**सा विनीततमा भैमी व्यर्थानर्थग्रहैरहो।**
**कथं भवद्विधैर्बाध् प्रमितिर्विभ्रमैरिव॥**[5]

पतिव्रत्यादिधर्मे निरतायाः दमयन्त्याः अनिष्टं चिन्तनं कलेः कृते अविधेयमिति सरलकथनं दुरूहन्यायशास्त्रस्य निगूढतत्त्वमण्डितपुरस्सरं कविः न्यायदर्शने स्वस्य निष्णाततायाः प्रमाणं प्रस्थापितवान् चेदपि श्लोकस्य मर्मार्थोपलब्धिना काव्यरसास्वादे काव्यरसपिपासवः पाठकाः क्लेशानुभवन्ति। श्लोकेऽस्मिन् उपमानत्वेन प्रमा, विपर्ययत्वेन अप्रमा इत्यनयोः सन्निवेशसाधनात् साधारणपाठकेभ्यः काव्यमेतद्दुर्बोध्यम्।

[4] तत्रैव – ४/१८
[5] नैषधीयचरितम् – १७/१४५

एतान् पूर्वोक्तान् विषयान् विहायापि श्रीहर्षेण न्यायवैशेषिकसम्बद्धा विविधविषया उपस्थापिताः। एतेषु एकस्मिन् श्लोके पञ्चज्ञानेन्द्रियानां तेषां कार्यकारिताञ्च उल्लिखितवान्। तद्यथा

**स्वप्नेन प्रपितायाः प्रतिरजनि तव श्रीषु मग्नः कटाक्षः**
**श्रोत्रे गीतामृताब्धौ त्वगपि ननु तनूमञ्जरीसौकुमार्ये।**
**नासा श्वासाधिवासेऽध्वरमधुनि रसज्ञा चरित्रेषु चित्तं**
**तन्नस्तन्वङ्गि कैश्चिन्न करणहरिणैर्वागुरा लङ्घितासि॥**[6]

हे कृशाङ्गि! प्रतिरजनि स्वप्नेन नीतायाः भवत्याः सौन्दर्यलहरीषु कटाक्षः निमग्नः। तव गानसुधासमुद्रे अस्माकं कर्णेन्द्रिये मग्ने, तव मूर्तिपुष्पगुच्छमार्दवे अस्माकं स्पर्शेनेन्द्रियम् अपि मग्नम्। हे सुन्दरि ! तव निःश्वासमारुतसौरभे अस्माकं घ्राणेन्द्रियं मग्नम्। तव अधरमधुनि मग्ना, तव चेष्टासु अस्माकं मनोरूपम् अन्तःकरणं मग्नम्। तस्मात् कारणात् अस्माकं कैश्चित् इन्द्रियरूपैर्मृगैः त्वं मृगबन्धनी रज्जुः न प्रापिताअसि। सर्वैरपि इन्द्रियैः प्रापिताऽसीति भावः। अस्माकं सर्वेन्द्रियमोहजनकं त्वद्रूपमिति तात्पर्यमिति श्लोकार्थः।

न्यायदर्शनस्य चाक्षुषप्रत्यक्षप्रक्रियां श्रीहर्षः स्वकाव्ये **अपाङ्गमप्याप दृशोर्न रश्मिः** इत्यादिश्लोकैः लिखितो वर्तते। नलस्य नेत्रयोः दीप्तिः दमयन्तीं कामयित्वा यत्कालं नेत्राऽन्तदेशमपि न प्राप। तत्कालम् एव कामबाणः सन्निकृष्टस्थायां सुन्दर्यां दमयन्त्यां प्रत्यवयवम् समूलाऽग्रं मग्नः इत्ययं श्लोकार्थः। नलस्य नेत्ररश्मिना प्रत्यक्षयोग्याय्याः दमयन्त्याः चाक्षुषसन्निकर्षेण दमयन्ती प्रत्यक्षविषयीभूता जाता। महाकविः श्रीहर्षः नलस्य साभिलाषं दमयन्तीदर्शनं न्यायसम्मतचाक्षुषप्रत्यक्षविषयरूपेण वर्णयन् न्यायशास्त्रकाव्ययोः समन्वयं साधितवान्।

न्यायसम्मतानामेतेषां षोडशपदार्थानां तथा उद्देश्यलक्षणयोः न्यायशास्त्रपारिभाषिक-शब्दद्वयोः उल्लेखः परिलक्ष्यते श्रीहर्षरचनायाम्। नैषधचरितमहाकाव्यस्य दशमसर्गे देव्याः सरस्वत्याः वर्णनाप्रसङ्गे उक्तम् -

**उद्देशपर्वण्यपि लक्षणेऽपि द्विधोदितैः षोडशभिः पदार्थैः।**[7]

---

[6] तत्रैव – ८/१०६

[7] नैषधीयचरितम् – १०/८२

महामतिना श्रीहर्षेण वेदन्तसहृदयेन न्यायनये मोक्षस्य महती निन्दा कृता। न्यायवैशेषिकप्रतिपादितां मुक्तिमुपहस्य उक्तवान् -

**मुक्तये यः शिलात्वाय शास्त्रमुचे सचेतसाम्।**
**गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः।**[8]

उद्धृते श्लोके कलेः उक्त्या न्यायदर्शनकारस्य महर्षिगौतमस्य निन्ता कृता।

भाट्टमीमांसकैः अङ्गीकृतं तमः वैशशेषिकदर्शने निराकृतम् इति सर्वजनविदितमेव। नीलं तमश्चलति इति प्रसिद्धं वाक्यमेव वर्तते। तमसः स्वरूपविषये वैशेषिकानां सिद्धान्तोऽयं नैषधचरिते उपस्थापितः। निषधाधिपतिः नलप्रियतमायाः दमयन्त्याः समीपे सन्ध्याकालस्य सौन्दर्यवर्णनां चकार। अद्वैतवेदान्तवादी श्रीहर्षः सन्ध्यावर्णनावसरे सकौतुकं वैशेषिकसम्मतस्य तमःस्वरूपस्योल्लेखनं कृत्वा उक्तदर्शनं प्रति उहसितवान्।

- **मीमांसादर्शनसम्मतं देवतास्वरूपम्**

जैमिनिमुनिः मीमांसासूत्रस्य प्रणेता। मीमांसादर्शने देवताशरीरं नाङ्गीक्रियते, मन्त्रस्य अपूर्वतैव तत्र चरमसत्यम्। जैमिनिमते देवताशरीरं मन्त्रमयं, न तु आकृतिमयम्। देवतानामायुधः अपि अर्थवादमात्रम्। मन्त्रातिरिक्तं देवतानां किमपि स्वरूपं नास्ति। तन्नये च देवता साकारोऽपि वर्तते निराकारो अपि वर्तते। देवतायाः चेतनत्वमसम्भवमिति सिद्धान्तः श्रीहर्षस्य रचनायां परिवेशितः। उपेन्द्रस्य सर्वस्वरूपस्वीकारात् मीमांसकजैमिनिमुनिभावः उत्पन्नम् युक्तम्। यतः स उपेन्द्रः ऋतुभुजां देवानां विरोधं शरीरमसहमानः सन् मद्वज्रं निष्प्रयजोनतां प्रापितवान्। उपेन्द्रो देवानां युद्धमसहिष्णुः सन् सुदर्शनचक्रेणा अस्मद्वैरिणो हत्वाऽस्मद्वज्रं निष्प्रयोजनं कृतवान्। विष्णोर्जैमिनिरूपकलनपक्षे विश्वरूपसूत्रप्रणयनेन मन्त्रा एव देवा इति प्रतिपाद्य “वज्रहस्तः पुरन्दर” इति वाक्यं निष्प्रयोजनं कृतवानिति श्लोकस्य भावार्थः।

मीमांसादर्शने देवतानां मन्त्रातिरिक्तं शरीरं नाङ्गीक्रियते। तस्मात् इन्द्रस्य वक्तव्यम् – नलेनुष्ठिते यज्ञे तेन शरीरधारणं कृत्वा हविग्रहणार्थमुपस्थित्य सर्वेषां संशयः दूरीकृतः। इन्द्रस्य अनया उक्त्या कवेः स्वकीयं दार्शनिकमतं प्रतिफलितम्। मीमांसकाः देवतानां साकारत्वे न विश्वसन्ति, किन्तु अद्वैतवेदान्ती श्रीहर्षः देवतानां शरीरसत्तामङ्गीकरोति।

[8] तत्रैव – १७/७५

मीमांसाकानां मतं नाङ्गीकृत्य देवता शरीरवान् इति कवेः स्वाभिमतं इन्द्रस्य उक्त्याम् अभिव्यक्तम्।

- **अदृष्टस्येश्वरस्य जगन्नियामकत्वम्**

मीमांसकानां मते अदृष्टरेव जगन्नियामकः, विषयेऽस्मिन् ईश्वरस्य कर्तृत्वमेव नास्ति। अत्र तु मनुष्यानां बुद्धिः परमेश्वरेच्छानुसारिणी उत मनुष्यानामदृष्टानुवर्तिनी विषयेऽस्मिन् दार्शनिकेषु संशयोऽस्ति। एतादृशं मतानैक्यचित्रं श्रीहर्षस्य लेख्यन्या वाणीरूपेण संनिबद्धम्। यथा -

**अनादिधाविस्वपरम्पराया हेतुस्रजः स्रोतसि वेश्वरे वा।**
**आयत्तधीरेष जनस्तदार्य्याः किमीदृशः पर्यनुयुज्य कार्यः॥**[9]

अस्मिन् श्लोके महाकविर्वक्ति यत् अदृष्टवशात् परमेश्वरेच्छानुसारेण दमयन्ती नलं प्रति अनुरक्ता। सुतरामस्मिन् क्षेत्रे दमयन्ती कथं न इन्द्रं प्रति अनुरक्ता इत्येवंरूपे प्रश्ने कृते सति दमयन्त्याः उपरि दोषारोपः अयौक्तिकः। एतदेव तात्पर्यम्। जगतः सर्वे प्राणिनः दैवाधीनाः सन्ति।

- **ज्ञानस्य स्वतः प्रामाण्यम्**

ज्ञानस्य प्रामाण्याप्रामाण्ययोः विषये दार्शनिकेषु वैमत्यं परिलक्ष्यते। सांख्याः ज्ञानस्य प्रमात्वाप्रमात्वे स्वतग्राह्यत्वेन अङ्गीकुर्वन्ति। नैयायिकानां मते ज्ञानस्य प्रामाण्याप्रामाण्ये परतोग्राह्ये स्तः। बौद्धदर्शने अप्रामाण्यं स्वतोग्राह्यत्वेन प्रामाण्यं परतोग्राह्यत्वेन च स्वीकृतम्। मीमांसकाः ज्ञानप्रामाण्यं स्वतोग्राह्यत्वेन अप्रमाण्यं परतोग्राह्यत्वेन चाङ्गीकुर्वन्ति।

अद्वैतवेदान्तिभिः स्वीकृतः ज्ञानस्य स्वतःप्रामाण्यवादः श्रीहर्षस्य रचनायामुपस्थापितः। यथा - **स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता।**[10] अर्थात् यथा ज्ञानानां प्रामाण्यं स्वतस्तथैव सज्जनानां परार्थप्रवृत्तिः स्वभावत एळ न तत्र प्रवर्तनाया अपेक्षेति भावः।

- **प्राभाकराणामख्यातिवादः**

[9] नैषधीयचरितम् – ६/१०२

[10] नैषधीयचरितम् – २/६१

नैषधचरितस्य एकस्मिन् श्लोके प्राभाकरसम्मतः अख्यातिवादः परिदृष्टः। देवतानां दूतरूपेण नलः दमयन्त्याः समीपे अदृश्यरूपेण उपस्थितः। उभौ परस्परं प्रति अनुरक्तौ। एमतावस्थायां तौ पारस्परिकमालिङ्गनं कृतवन्तौ। चित्रमिदं श्रीहर्षस्य वाङ्मनिर्मितौ अनवद्यकाव्यरूपेण परिगृहीतम्। यथा

**अन्योन्यमन्यत्रवदीक्षमाणौ परस्परेणाध्युषितेऽपि देशे।**
**आलिङ्गितालीकपरस्परान्तस्तथ्यं मिथस्तौ परिषस्वजाते॥**[11]

भैमीनलौ अन्योन्येन अधिष्ठिते स्थाने अपि परस्परं देशान्तर इवि पश्यन्तौ आलिङ्गनमिथ्यात्वज्ञानं यथा तथा अन्योन्यं यथार्थम् एव आलिङ्गनं चक्रतुः इति श्लोकार्थः। नायकनायिकयोः अलीकमिदमालिङ्गनं यथार्थसत्यरूपेण पर्यवसितम्। तस्मात् कवेः अभिप्रायः प्राभाकरसम्मतमख्यातिवादं विना व्याख्यातुमसम्भवः इति टीकाकारः चाण्डुपण्डितः उक्तवान्।

वेदान्तदार्शनिकाः अख्यातिवादं नाङ्गीकुर्वन्ति। वेदान्तदार्शनिकः श्रीहर्षः परमतसहिष्णुः प्राभाकरसम्मतमख्यातिवादं श्लोकेऽस्मिन् उल्लिख्य सः न खण्डितवान्।

- **वेदान्तदिशा ब्रह्मस्वरूपं मुक्तिस्वरूपं च**

नैषधचरितस्य बहुषु श्लोकेषु ब्रह्मणः अनिर्वचनीयत्वमानन्दात्मकत्वं च प्रतिपादितम्।

**नेत्राणि वैदर्भसुतासखीनां विमुक्ततत्तद्विषयग्रहाणि।**
**प्रापुस्तमेकं निरूपाख्यरूपं ब्रह्मैव चेतांसि यतव्रतानाम्॥**[12]

भैमीवयस्यानां नयनानि परित्यक्ततत्तच्छब्दादिविषयग्रहणानि सन्ति। एकमद्वितीयमनिर्वाच्याकारं पुरोवर्तिनं राजहंसं योगिनां अन्तःकरणानि परात्मानम् इव आसादयामासुः। अत्र श्रीहर्षेण काव्यदर्शनयोः अपूर्वं समन्वयं साधितवान्।

ब्रह्म सर्वेषु जीवेषु अधिष्ठितम्। संसारिणः तद्ब्रह्मणः स्वरूपोलब्धिं कर्तुं न शक्नुवन्ति। संयमिनः तद्ब्रह्मलाभार्थमेकाग्रतामवलम्बयन्ति। विषयोऽयमुपमानरूपेण एकस्मिन् श्लोके उपस्थापितः -

**हंसं तनौ सन्निहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम्।**

[11] तत्रैव – ६/५१

[12] नैषधीयचरितम् – ३/३

**ग्रहीतुकामा दरिणा शयेन यत्नादसौ निश्चलतां जगाहे॥**[13]

अर्थात् दमयन्तीः योगिनः चित्तवृत्तिः इव स्वकीयायां शरीरसमीपे निकटस्थमाविर्भूतं सञ्चरन्तं वर्तमानं मरालं निर्भयेन पाणिना आदरयुक्तेन चित्तेन आदातुकामा साक्षात्कर्तुकामा च सती प्रयत्नात् निश्चलाऽङ्गत्वं स्थिरतां जगाम इति श्लोकार्थः।

एवंरूपेण ब्रह्ममोक्षप्रतिपादकानि बहूनि तत्त्वानि अत्र उपस्थापितानि। विस्तरभयान्नोलिख्यन्ते सर्वाणि।

मुक्तिः आनन्ददायकत्वमनिर्वचनीयत्वं च श्रीहर्षेण बहुषु श्लोकेषु प्रतिपादितम्।

**अधिगत्य जगत्यधीश्वरादथ मुक्तं पुरुषोत्तमात्ततः।**
**वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः॥**[14]

यथा विप्रो भुवनपतेर्विष्णोर्मोक्, प्राप्य अनिर्वचनीयमानन्दं प्राप्नोति तथैव स हंसोऽपि भूपतेः मोचनं प्राप्य वाचामविषयं सुखं प्राप्तवानिति श्लोकार्थः। मुक्तिः आनन्ददायका तथा मुक्तेः एतत् आनन्दमनिर्वचनीमिति एतत् वेदान्ततत्त्वं निपुणतया श्लोकेऽस्मिन् उपस्थापितम्।

- **स्वप्नतत्त्वम्**

जीवानां त्रिषु दशासु स्वप्नदशा अतिमहनीया वर्तते। स्वप्नदशायामेव वयं ब्रह्मानन्द-सहोदरमानन्दमनुभवामः। श्रीहर्षेण स्वप्नदशाया अपि परमोल्लेखः महाकाव्ये कृतः वर्तते।

**निमीलितादक्षियुगाच्च् निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रितात्।**
**अदर्शि संगोप्य कदाप्यवीक्षितो रहस्यमस्याः स महन् महीपतिः॥**[15]

श्लोकेऽस्मिन् नलगतप्राणायाः दमयन्त्याः स्वप्नरहस्यं वर्णितमस्ति। श्लोकस्यार्थोऽयम् – स्वापेन मुद्रितात् नेत्रयुगलात् बहिरिन्द्रयाऽव्यापारनिमीलितात् मनसः अपि संगोप्य कदाऽपि अदृष्टः दमयन्त्याः महत्वपूर्णं रहस्यं पूर्वोक्तः राजा नलः दर्शितः इति।

स्वप्नवेलायामिन्द्रियसमूहानां व्यापारः विरतो भवति। स्वप्नविषयः न बाह्येन्द्रियग्राह्यः, न तु अन्तरेन्द्रियग्राह्यः। अनेन सह अदृष्टसहकृतः अविद्यावृत्तिरूपो

[13] नैषधीयचरितम् – ३/४
[14] तत्रैव – २/१
[15] नैषधीयचरितम् – १/४०

सुषुप्तिनामकव्यापारः युक्तः। अन्तःकरणवासनावशात् स्वप्नविषयाः अविद्यावृत्त्यन्तर्भूक्ताः सन्ति इति तात्पर्यम्।

एवंरूपेण लिङ्गशरीरे आमुक्तिस्थितिविषये तेन सन्दर्भः उपस्थापितः। तद्यथा –

**अमूनि गच्छन्ति युगानि न क्षणः कियत् सहिष्ये न हि मृत्युरस्ति मे।**
**स मां न कान्तः स्फुटमन्तरुज्झिता न तं मनस्तच्च न कायवायवः॥**[16]

नलमुद्दिश्य दमयन्त्याः विलापोक्त्या इदं वेदान्ततत्त्वं प्रतिभासितम्। एतानि युगानि व्रजन्ति। क्षणरूपः न। कियत् मर्षयिष्यामि। यतः मे मरणं न विद्यते, अतः सहनस्य अवधिर्नास्तीति भावः। सः प्रियः नलः अन्तःकरणे कान्तां न त्यक्त्वा, व्यक्तं तं कान्तं नलं मानसं च अद्य न उज्झितृ। एवञ्च तत् मनः प्राणाः न त्यागकर्तारः। हन्त ! का गतिरिति भावः।

- **सांख्यमते सत्कार्यवादः**

सांख्यमते प्रागुत्पत्तेः कार्यं कारणे अव्यक्तरूपेण अवस्थीयते। यथा प्रागुत्पत्तेः दधिः अव्यक्तवस्थायां दुग्धरूपेणावस्थीयते, परे कारणसंयोगे अभिव्यक्तं भवति। सांख्यदर्शनस्वीकृतः अयं सत्कार्यवादः श्रीहर्षरचनायां समुपलभ्यते। यथा –

**नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः।**
**वीक्ष्य वः खलु तनुममृतादं दृङनिमज्जनमुपैति सुधायाम्॥**[17]

इन्द्रं प्रति नलस्योक्तिरियं श्लोकरूपेण उल्लिखिता। मानवशरीरं भक्ष्यपदार्थोत्पन्नमिति सत्यं। पीयूषभुजां युष्माकं शरीरं दृष्ट्वा मदीयं लोचनम् अमृते निमज्जनं प्राप्नोति इति श्लोकार्थः।

- **योगशस्त्रीयसम्प्रज्ञातसमाधिः**

देवतानां मूर्तिसदृशे स्थूलविषये यदि चित्तं ध्यानाविष्टं भवति तदा सम्प्रज्ञातसमाधिरिति योगसूत्रमतम्। नैषधचरितस्य एकस्मिन् श्लोके सम्प्रज्ञातसमाधेः उल्लेखनं महाकविश्रीहर्षेण कृतम्

**इत्युदीर्घ स हरिं प्रति सम्प्रतज्ञातवासिततमः समपादि।**

[16] तत्रैव – ९/९४
[17] नैषधीयचरितम् – ५/९४

**भावनावलविलोकितविष्णौ प्रीतिभक्तिसदृशानि चरिष्णुः॥**[18]

हरिमुद्दिश्य एतदुक्त्वा नलः सम्प्रज्ञातसमाधौ स्थितः। नलः ध्यानबलपूर्वकं विष्णोः प्रत्यक्षणं कृत्वा तदुद्दिश्य प्रीतिभक्त्योपयोग्याचरणं कृतवान्। पूर्ववर्तिनि श्लोके नलकृता विष्णुस्तितिः वर्णिता। विविदोपायेन स्तुतिं कृत्वा ध्येयदेवतास्वरूपोपलब्ध्यर्थं नलः ध्यानस्थितः। नलस्य अनया ध्यानरतावस्थया सह कविः योगिनः सम्प्रज्ञातसमाधेः तुलनं कृतवान्।

एवंरूपेण नास्तिकदर्शनस्यापि बहवो सिद्धान्ताः पूर्वोक्ताः अत्र प्रतिपादिताः। तेषामप्रसिद्धत्वात् विस्तरभयान्न ते लिख्यन्ते। वस्तुतः विविधदिग्गामिन्याः संस्कृतसाहित्यधारायाः महाकाव्यिकविभागेषु दार्शनिकचिन्तनस्य महत् प्रतिफलनं परिलक्ष्यते, तत्तु प्रमाणनिरपेक्षम्। अश्वघोष-भारवि-माघ-श्रीहर्षादिमहाकवीनां काव्यसृष्टौ कविप्रतिभया सह दार्शनिकप्रज्ञायाः अपूर्वं मेलबन्धनमस्ति। प्रबन्धेऽस्मिन् महाकविश्रीहर्षस्य नैषधचरितमहाकाव्ये दार्शनिकतत्त्वसमावेशनं तथा दार्शनिकचिन्ताधारां महाकाव्योचितोपादाने परिणमयितुं कविचातुर्यस्य विश्लषणकरणे प्रयासो विहितो मया।

## परिशीलितग्रन्थपञ्जी


आपदेवः। (१९३७)। *मीमांसान्यप्रकाशः* (प्रभाव्याख्योपेतः)। शास्त्री वासुदेवः (सम्पा०)। पुने : पुने उरियेन्टाल रिसार्च इन्सटिटिउट्।

माधवः। २००४। *सर्वदर्शनसंग्रहः* (प्रकाशव्याख्योपेतः)। शर्मा उमाशङ्करः (सम्पा.)। वाराणसी : चौखम्बाविद्याभवन।

ईश्वरकृष्णः. *सांख्यकारिका,* श्रीविश्वनारायणशास्त्रिविरचितया सांख्यबोधिनीव्याख्यया तत्कृतटिप्पण्या च समलंकृता, वाचस्पतिमिश्रविरचितया सांख्यतत्त्वकौमुद्या च विभूषिता, चौखम्बा विद्याभवन, वाराणसी, २००२.

पतञ्जलिः. *पातञ्जलयोगदर्शनम्,* तत्त्ववैशारदीयोगवार्तिकटीकाद्वयोपेतं व्यासभाष्यम्, सम्पादिका विमला कर्णाटक, काशीहिन्दुविश्वविद्यालय एवं रत्नापाब्लिकेशन, वाराणसी, १९९२.

पतञ्जलिः. *योगदर्शनम् षट्टीकोपेतम्;* चौखम्बा संस्कृत सीरिज आफिस, बनारस, १९५१.

*Naiṣ adhiyacaritam of s□rīharṣ a*: (with ‘*Prakā s□a*’ Commentary of Mallinā tha, Vidyadhara Jinrajacaritravardhan and Narayana Ramacarya Kavyatirtha) NSP, Bombay, 1952.


[18] नैषधीयचरितम् – २१/११८

# पाणिनीयप्रस्थाने काशिकाया गुरुत्वम्

-डॉ.श्रीमन्तचटर्जी (Dr. SRIMONTA CHATTERJEE)

सहकारी अध्यापकः

संस्कृतविभागः

त्रिवेणीदेवी-भालोटिया-महाविद्यालयः, राणीगञ्जनगरम्,

पश्चिमवङ्गप्रदेशः।

महाभाष्यात्परं काशिका एव व्याकरणग्रन्थेषु प्राचीनतमः प्रामाणिकतमश्च ग्रन्थो वर्तते। महाभाष्यं भर्तृहरिविरचितं वाक्यपदीयञ्च विहाय ग्रन्थोऽयं सर्वाधिकः समादृतो महत्त्वपूर्णश्च। काश्यां विरचनादियं काशिका। तथाह्युक्तं-- काशिकेति देशतोऽभिधानम्। काशिषु भवा 'काश्यादिभ्यष्ठञ्ञिठौ' "काशिका"[1] इति। अर्थान्तरमपि विद्यते-- प्रकाशयति सूत्रार्थमिति काशिका, जयादित्यविरचिता वृत्तिः। काश्यां भवा वेति (सृष्टिधरः)। पाणिनीयसूत्राणि व्याकरणस्य आत्मा सन्ति। काशिका भवति तस्य शरीरम्। अस्यैव शास्त्रशरीरस्य रक्षाबन्धः परिशिष्टः अंशो भाष्यकारादिना आक्षेपसमाधानादिमुखेन प्रणीयते। काशिकाकारौ स्वयमेव उद्घोषयतो यत् व्याकरणकार्यं काशिकापर्यन्तमेवास्ति--

व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमेतावत्।

शिष्टः परिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण।। इति।

काशिकायाः प्रथमपञ्चाध्यायाः जयादित्येन अन्तिमत्र्यध्यायाः वामनेन रचिताः। पतञ्जलिप्रभृतिवैयाकरणैः अतिविस्तृतं बहुपरिश्रमसाध्यञ्च व्याकरणं वामन-जयादित्यौ शोधं कृतवन्तौ। अस्यां अति सरलरीत्या सोदाहरण-सूत्र-व्याख्यान-प्रतिपादनपरापेक्षितभावप्रकाशनं दृश्यते। पाणिनेः अष्टाध्यायीक्रमावलम्बिनि अस्मिन् ग्रन्थे प्रतिसूत्रम् अनुवृत्त्युदाहरणप्रत्युदाहरणानि शङ्कासमाधानानि चापि समुपलभ्यन्ते। अत्र पाणिनीये काशिकाग्रन्थस्य गुरुत्वं यथामति समालोच्यते।

---

[1]पदमञ्जरी, काशिका, भाग१, पृ.४

यद्यपि काशिकावृत्तेः प्राक् चुल्लिभट्टिनिर्लूरादिभिः बहुवृत्तिग्रन्थे विरचितेऽपि, पातञ्जलमहाभाष्ये प्राप्तेऽपि वा पुनः काशिकाकृता काशिकावृत्तिरचनं निष्प्रयोजनमिति चेदत्रोच्यते वृत्त्यादौ विक्षिप्तस्य विस्तारितस्य च व्याकरणग्रन्थस्य उत्कृष्टोंऽशोऽस्यां काशिकावृत्तौ संगृह्यते। तथाहि व्यरचि वामनजयादित्येन प्रत्याहारप्रकरणे --

"वृत्तौ भाष्ये तथा धातुनामपारायणादिषु।

विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः।।" इति।

इष्टिव्याख्याने विशेषयोगदानं वर्तते अस्य ग्रन्थस्य, यथा --

"इष्ट्युपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था।

व्युत्पन्नरूपसिद्धिर्वृत्तिरियं 'काशिका ' नाम ।। इति।

सूत्रेण असङ्गृहीतं लक्ष्यं येन संगृह्यते तदुपलक्षणमिष्ट्युपसंख्यानग्रहणम्। अतः सूत्रेण यल्लक्षणं न साध्यते, अपि तु भाष्यादिवचनानां व्याख्यानेन तत्सिद्धं भवति। एतादृशी व्याख्योपेता हीयं काशिकावृत्तिः। वृत्त्यन्तरात् काशिकायाः पार्थक्यं तावद् 'वृत्त्यन्तरेषु सूत्राण्येव व्याख्यायन्ते , इयं पुनरिष्ट्यादिमती' इति। अतः काशिकायां खलु यथा सूत्राणि व्याख्यायन्ते तथा इष्ट्युपसंख्यानमपि भवतीति विशेषः।'

यथोदाहरणं-- 'सर्वपुरुषाभ्यां णढञौ'[2] इति सूत्रभाष्ये 'सर्वाण्णस्य वेति वक्तव्यम्। सार्वः, सर्वीयः।।' इति इष्टिवचनमेकम्। हितमर्थे सर्वशब्दात् वैकल्पिको णो भवतीति वार्तिकार्थः। परन्तु प्रश्नोऽयं समुदेति प्रोक्तवचनमिदम् इष्टिरिति कथं ज्ञायते?- इत्यत्रास्माभिर्वक्तव्यं यत्-- "हितप्रकरणे णञ्च सर्वशब्दात् प्रयुज्यते। ततश्छमिष्ट्या च........" इति काव्यालङ्कारे भामहवचनं प्रमाणीकरोति एषा हि इष्टिः। सा इष्टिरत्र काशिकाकृता काशिकायामालोचिता। अत एव 'इष्ट्यादिमती काशिका' इति नामप्रदत्तं सार्थकम्।

एवं 'न बहुव्रीहौ' [3] इति सूत्रस्य भाष्ये भाष्यकारेणाभाषि-- "गोर्नदीयस्त्वाह-- अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयम्। त्वकत्पितृको मकत्पितृक इत्येव भवितव्यम्।" इति। अत्र 'गोर्नदीय' इत्युक्ते भगवान् पतञ्जलिः परामृश्यते।

---

[2]पा.सू.-५.१.१०

[3]पा.सू.-१.१.२९

प्रोक्तभाष्यवचनं भाष्यकृतः स्वकीयवचनाद् इष्टिरित्युच्यते। अस्यां व्याख्यायां काशिकाकारो लिखति-- 'बहुव्रीहौ समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति.......। इह च त्वत्कपितृकः, मत्कपितृक इत्यकज् न भवति' इति। वस्तुतो भाष्यकृता त्वकत्पितृकः, मकत्पितृकः इति इष्टरूपद्वयं स्वीकृत्य सूत्रमिदं प्रत्याख्यातम्।

गणशुद्धिविषयेऽपि तयोः योगदानमस्ति। अत्र काशिकायां गणशुद्धिरपि दरीदृश्यते। यथा-- "लोहितादिडाज्भ्यः क्यष्"[4] इति सूत्रं व्याख्यातुकामः काशिकाकारः कथयति-- "लोहितादिभ्यो डाजन्तेभ्यश्च भवत्यर्थे क्यष्प्रत्ययो भवति।.......लोहितायति लोहितायते। डाजन्तेभ्यः पटपटायति पटपटायते" इति। अपरतः "लोहितादिडाज्भ्यः क्यष्वचनम्, भृशादिष्वितराणि"[5] इति वार्तिकं व्याचिख्यासुः काशिकाकारो गणशुद्धिं कृत्वा आह-- "यानि लोहितादिषु पठ्यन्ते तेभ्यः क्यङेव, अपरिपठितेभ्यस्तु क्यषेव भवति। वर्मायति, वर्मायते----" इति। एवम्भूता गणशुद्धिः काशिकाकारेण काशिकायां सुस्पष्टतया समुल्लिखिता। अयं भावो वर्ततेऽत्र-- लोहितादिसूत्रेण यदेतत् क्यषो विधानं तल्लोहिताद्, डाजन्तेभ्यश्च भवति। यदन्यानि नीलादिशब्दरूपाणि लोहितादिषु पठ्यन्ते तेषां लोहितशब्दात् भिन्नत्वात् भृशादिषु पाठो द्रष्टव्यः। यस्त्विह तेषां पाठः, स प्रमादतः। आर्षमिति न वक्तव्यम्, अर्वाक्कालभावित्वात्। अर्थात् यानि प्रमादाल्लोहितादिषु पठ्यन्ते तेषां भृशादिषु पाठो वेदितव्यः, न त्वपरिपठितानां वर्मादीनाम्

पुनश्च, "कण्वात्तु शकलः पूर्वः कतादुत्तर इष्यते।
पूर्वोत्तरौ तदन्तादिष्फाणौ तत्र प्रयोजनम्।।"

-इति गणशुद्ध्यर्थं 'सर्वत्र लोहितादिकतन्तेभ्यः' [6] इति सूत्रस्य भाष्यवार्तिकमिदं काशिकाकारेणापि समर्थितम्। अस्य सूत्रस्य व्याख्यायां तेन काशितं– 'सर्वत्र लोहितादिभ्यः कतपर्यन्तेभ्यः [7] यञन्तेभ्यः स्त्रियां ष्फः प्रत्ययो भवति। कतशब्दः स्वतन्त्रं यत्प्रातिपदिकं तदवधित्वेन परिगृह्यते-कपिशब्दात् परः कपि कत इति, न प्रातिपदिकावयवः कुरुकतेति। लौहित्यायनी, शांसित्यायनी, व्राभ्रव्यायनी' इति।

---

[4]पा.सू.-३-१-१३

[5]वा.-१८८

[6]पा.सू.-४.१.१८

[7]पा.सू.-४.१.१०५

अयं भावः -- यो ह्यन्यस्यावयवभूतो न भवति केवलः कतशब्दस्तत् स्वतन्त्रं प्रातिपदिकम्। यस्तु कुरुकतशब्दस्यावयवः कतशब्दस्तस्य स्वातन्त्र्यं नास्ति, समुदायप्रतिबद्धत्वात्। कपिशब्दात् परः यः कतशब्दः तदेवात्र गृह्यते, यथा-- लोहितः, शंसितः, वभ्रुश्च। तस्मादेतेभ्यः स्त्रियां फप्रत्यये यथाक्रमं लौहित्यायनी, शांसित्यायनी, व्राभ्रव्यायनी चेति रूपत्रयम्। इत्थम्भूता गणशुद्धिः स्वयं काशिकाकृता काशिकायां विहिता। वृत्त्यन्तरेषु तु एवंविधो गणपाठो नास्ति। तत्र प्रागेव शुद्धिः क्रियते।

'णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने' [8] इत्यत्र सूत्राणां गूढार्थः काशिकायां प्रकाशितोऽस्ति। अत्र 'ण्यन्तादात्मनेपदं भवति। कथम्? 'अणौ इति किम्?' 'कर्मग्रहणं किम्?' 'कर्ता इति किम्?' 'अनाध्याने इति किम्?' इति विविधानां प्रश्नानां समाधानं तत्रभवता सविस्तरं समाहितम्। गूढः सूत्रार्थो विवृतो यया सा विवृतगूढसूत्रार्था। अत्र गूढग्रहणं सूत्रार्थमात्रोपलक्षणम्। तेन सूत्रार्थप्रधानमूला काशिकेति गम्यते।

अपि च, पाणिनीयसूत्रैरसमाहितानां भाष्यवार्तिकयोश्चानुपलब्धानां पदानां पक्षाणां चापि सिद्ध्यर्थं ताभ्यां सफलयत्नं विहितम्। यथा "परिमुखं च"[9] इति सूत्रस्य व्याख्यायां रचितं तत्रभवता-- चकारोऽनुक्तसमुच्चयार्थः[10] इति।

अत्र १२५ स्थानेषु केचित्, अन्येषाम्, इतरेभ्यः इत्यादिपदैः प्राचीनाचार्याणाम् उल्लेखो विधीयते ग्रन्थकाराभ्याम्। तेषु पाणिनि-कात्यायन-पतञ्जलि-शाकटायन-आपिशलिप्रभृतयः सन्ति। "लुपि युक्तवद्व्यक्तिवचने" [11] इति सूत्रव्याख्याने 'व्यक्तिवचने इति च लिङ्गसंख्ययोः पूर्वाचार्यनिर्देशः' इति वचनेन ताभ्यां 'व्यक्तिवचने' इति शब्दस्य तात्पर्यं तथा 'पूर्वाचार्याणाम् अयं निर्देश' इति उक्त्वा पूर्ववर्तिवैयाकरणा आचार्या वोल्लिखिताः।

दृष्टान्तविषये काशिकाकाराभ्यां आधिक्येन महाभाष्यं, काशिकातः पूर्ववर्ती व्याकरणग्रन्थश्चैव आश्रीयते। यथा "आङ् मर्यादावचने" [12] इति सूत्रव्याख्याने 'आ

[8] पा.सू.-१.३.६७

[9] पा.सू.-४.४.२९

[10] पा.सू.-४.४.२९ व्याख्याभागः

[11] पा.सू.-1.2.51

[12] पा.सू.-1.4.89

कुमारं यशः पाणिनेः' इति वदता तौ भगवतः पाणिनेः महत्त्वं प्रकटयतः।

इदानीमुदाहरणद्वारा महाभाष्यतः काशिकाया वैशिष्ट्यानि पर्यालोच्यन्ते–

**प्रथमतः** "प्रत्ययस्य लुक्श्लुलुपः"[13] इति सूत्रे भाष्यकृता यथा 'प्रत्ययग्रहणं किमर्थम्' इति आक्षिप्य 'लुमति प्रत्ययग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थम् ' इति समाहितम्। काशिकाराभ्यां तत्र स्पष्टीकृतम्-- 'अदर्शनम्' इति वर्तते। प्रत्ययादर्शनस्य लुक्-श्लु-लुप्--इत्येताः संज्ञा भवन्तीति।

**द्वितीयतो** भाष्येऽनुपलब्धस्य व्याख्यानस्योपस्थापनं काशिकाया अपरं वैशिष्ट्यं, यथा--फणिभाष्येऽनुपलब्धस्य "अचोऽन्त्यादि टि"[14] इति सूत्रं वर्णयता काशिकाकृता प्रतिपादितम्-- 'अचः' इति निर्धारणे षष्ठी। जातावेकवचनम्। अचां संनिविष्टानां योऽन्त्योऽच् तदादि शब्दरूपं टिसंज्ञं भवतीति। अस्माद्व्याख्यानाद् अचां मध्ये योऽन्त्योऽच् स आदिर्यस्य तट्टिसंज्ञं भवेदिति ज्ञानं भवति।

**तृतीयतो** हलन्त्यम्[15] इति सूत्रस्य अन्योन्याश्रयदोषपरिहाराय तयोः सविशेषं व्याख्यानं युक्तियुक्तम् अस्ति। तद्यथा- वाक्यार्थज्ञानं प्रति पदार्थज्ञानं कारणं भवतीति नियमात् यावद् इदिति पदार्थस्य ज्ञानं न भविष्यति, तावत्पर्यन्तम् 'आदिरन्त्येन सहेते' [16] ति सूत्रस्य अर्थो भवितुं नार्हति। 'इत्' इति पदेन कस्य ग्रहणमिति 'हलन्त्यमि'ति सूत्रेणैव ज्ञायते, यतो हि इत्संज्ञां तदेव सूत्रं करोति। अतः 'आदिरन्त्येन सहेते'ति सूत्रस्य अर्थबोधार्थं पूर्वमस्माभिः इत्पदार्थस्य ज्ञानं कर्तव्यम्। इत्पदार्थस्य च ज्ञानं हलन्त्यं विना न सम्भवति। 'हलन्त्यमि'ति सूत्रस्य अर्थकरणाय अस्माभिः 'हल्' इति पदस्य कोऽर्थ इति अवश्यमेव ज्ञातव्यम्। तदनन्तरमेव 'हलन्त्यमि'ति सूत्रस्य अर्थो भवितुमर्हति। हल्प्रत्याहारस्य च ज्ञानम् 'आदिरन्त्येन सहेते'ति सूत्रं विना न सम्भवति। एवञ्च 'हलन्त्यमि'ति सूत्रस्य ज्ञानं हल्पदार्थज्ञानाधीनमस्ति। हल्पदार्थज्ञानञ्च 'आदिरन्त्येन सहेते'ति सूत्राधीनम्। 'आदिरन्त्येन सहेते'ति सूत्रस्य अर्थ इत्पदार्थज्ञानाधीनोऽस्ति। इत्पदार्थज्ञानञ्च

---

[13]पा.सू.-१.१.६१

[14]पा.सू.-१.१.६४

[15]पा.सू.-१.३.३

[16]पा.सू.-१.१.७१

हलन्त्यमिति सूत्राधीनम्। एवञ्च एवमपि वक्तुं शक्यते यत् 'हलन्त्यमि'ति सूत्रस्य अर्थः 'आदिरन्त्येन सहेते'ति सूत्रस्य ज्ञानाधीनः। 'आदिरन्त्येन सहेते'ति सूत्रस्य अर्थो 'हलन्त्यमि'ति सूत्रस्य ज्ञानाधीनः। एवञ्च परस्परापेक्षत्वादत्र अन्योन्याश्रयदोषः उभयोः सूत्रयोर्मध्ये वर्तते। अस्य अन्योन्याश्रयदोषस्य समाधिर्दीयते काशिकाकाराभ्यां, यथा-- हस्य ल्-हलिति द्वितीयमत्र हलग्रहणं तन्त्रेणोपात्तं द्रष्टव्यम्, तेन प्रत्याहारपाठे 'हल्' इत्यत्र लकारस्य इत्संज्ञा क्रियते। तथा च सति, 'हलन्त्यम्' इत्यत्र प्रत्याहारे नेतरेतराश्रयदोषो भवतीति।

**चतुर्थतः** "कारके"[17] इति सूत्रस्य व्याख्यायां विरचितं काशिकाकाराभ्यां-- 'कारकशब्दश्च निमित्तपर्यायः। कारकम्, हेतुरित्यनर्थान्तरम्। कस्य हेतुः? क्रियायाः' इति। वस्तुतः कारकशब्दोऽयं व्युत्पन्न-अव्युत्पन्नभेदेन द्विधा व्युत्पादितः। व्युत्पन्नपक्षे कृधातोरुत्तरं कर्तृवाच्ये ण्वुलि कारकशब्दोऽयं निष्पाद्यते। तथात्वे स्वीक्रियमाणे अपादानादिषु कारकशब्दो न प्रवर्तेत, तेषामस्वतन्त्रत्वात्। तस्मात् कारकशब्दस्य व्युत्पन्नार्थं परित्यज्य क्रियानिमित्तरूपाव्युत्पन्नार्थः ताभ्यां स्वीकृतः। तथा सति स्वातन्त्र्येणैव भवतु पारतन्त्रेण वा, मुख्यक्रियां प्रति कर्तृकर्मादिसर्वकारकाणामेव निमित्तत्वे कारणत्वे वा सिद्धे सिध्यति तेषां कारकत्वम्।

**पञ्चमतः** प्रक्रियालाघवार्थं व्याख्यातृभिः निपातनव्यवस्था समाश्रिता। काशिकायां काशिकाकाराभ्यामपि काशितं -- यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धमिति[18]। वैदिकप्रक्रियायामपि निपातनव्यवस्थेयं समाश्रीयते काशिकाकारेण। यथा-- "दृशे विख्ये च" [19] इति सूत्रस्य व्याख्यायां ताभ्यां शब्दद्वयमिदं निपातनपरिकल्पितमिति सिद्धान्तितम्। निष्कर्षत एतद्वक्तुं शक्यते पाणिनीयसूत्रव्याख्याने काशिकाया अति महत्त्वपूर्णं सविशेषं योगदानमस्तीति शम्

**<u>संकेताक्षरसूची :-</u>**

पा. सू.- पाणिनीयसूत्रम्।

---

[17] पा.सू.-१.४.२३

[18] पा.सू. ५.१.५९

[19] पा.सू. ३.४.११

वा.- वार्तिकम्।

**<u>सहायकग्रन्थाः -</u>**

१) अयनभट्टाचार्यविरचितः कारकविवेकः, संस्कृत-बुक्-डिपो, कलिकाता, २०१२

२) पाणिनिविरचिता अष्टाध्यायी, सम्पा. गोपालदत्तपाण्डेयः , चौखम्बा सुरभारती प्रकाशनम्, वाराणसी,२००७।

३) भट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी ; सम्पा. श्रीगिरिधरशर्मा, श्रीपरमेश्वरानन्दशर्मा च, मोतीलाल बनातसीदास , देहली , २००४।

४) महर्षिपतञ्जलिरचितं प्रदीपोद्द्योतटीकासमेतं महाभाष्यम्, सम्पा. दधिरामशर्मा, चौखम्बा संस्कृतप्रतिष्ठानम्, वाराणसी,१९९१।

५) वामनजयादित्यविरचिता काशिका ; सम्पा. जयशङ्करालाल त्रिपाठी, सुधाकरमालवीयश्च, तारा वुक् एजेन्सी, प्रथमसंस्करणम् १९८६, पुनर्मुद्रणम्- २००९।

--- ASSISTANT PROFESSOR

DEPT. OF SANSKRIT

TRIVENI DEVI BHALOTIA COLLEGE

RANIGANJ-713 347, PASCHIM BARDHAMAN,

WEST BENGAL.

Mobile: 8145 986897.

E-MAIL: srimontarkmv@gmail.com

---

# संस्कृतवाङ्मये नारीणां स्वरूविमर्शः

*शोधार्थी – सन्दीप चटर्जी*

*केन्द्रीयसंस्कृतविश्वविद्यालयः*

*दूरवाणीसंख्या – 8250622413*

*Gmail id – sandipchat03@gmail.com*

***नारीणां सम्मानास्पदत्वम्*** –

वैदिककालाद् आरभ्य इदानीं यावत् समाजे स्त्रीणां स्थानम् अतीव गौरवास्पदं विद्यते। नारीशब्दस्य अर्थो भवति न अरिः इति नारी शब्दकोशग्रन्थेषु नुः नस्य वा धर्म्या इत्यपि व्युत्पत्तिः समुपलभ्यते। एवं सिद्ध्यति यत् पुरुषाणां कृते नारी सर्वथा मित्रवत् कार्यं करोति। नारी गृहिणी, गृहस्वामिनी, सहधर्मिणी इत्यादिभिः विशेषणैः सम्बोध्यते स्म। जन्मनः विवाहकालं यावत् पितुः गृहे कन्या इति पावनेन शब्देन वाच्यायाः अस्याः समाजे अस्माकं महत्त्वं परममस्ति। पत्नीरूपेण सा गृहस्वामिनीपदम् अलङ्करोत्। वेदे यथोच्यते-

**सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव।**

**ननान्दरि सम्राज्ञी भव समाज्ञी अधि देवृषु॥**[1]

**जायेदस्तम् जाया एव अस्तं गृहमित्यर्थः॥**[2]

---

[1] ऋग्वेदः – १०.८५.४६

[2] ऋग्वेदः – ३.५३.४

गृहस्थाश्रमे नार्यः प्राधान्यं दृश्यते। अस्माकं शास्त्रेषु अपि कथितमस्ति यत् –

**न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते॥**[3]

गृहेषु यत्र नार्य सम्मानिताः भवन्ति। गृहस्य सर्वैः जनैः नारीणां सुखस्य प्रसन्नतायाश्च चिन्तनं क्रियते तत्र सदैव लक्ष्म्या वासो भवति। एतादृशेषु गृहेषु सर्वेषां देवानां महती कृपा भवति। विषयेऽस्मिन् मनुना उक्तम् –

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥**

नारी सर्जनात्मिका शक्तिरूपा विद्यते। निखिलजगत्भ्रमोत्पादिका मायारूपा ब्रह्माशक्तिः अपि नारीस्वरूपे अवस्थितास्ति। अस्माकं धर्मशास्त्रैः अपि स्त्रियः समस्तास्तव देवि भेदाः इति वचनानुसारेण सर्वाः स्त्रियः महद्मायायाः आद्यशक्तेः स्वरूपेणैव प्रतिपादिताः।

**नारीशिक्षायाः महत्त्वम् –**

अस्मिन् भारते स्त्रीशिक्षायाः महत्त्वपूर्णं स्थानं राजते। ऋग्वेदे स्त्रीणां शिक्षायाः व्यवस्था निर्दिश्यते। पुत्रवत् तासामपि उपनयादिसंस्काराः अभूवन्। वेदाध्ययनेऽपि तासामधिकारोऽङ्गीक्रियते स्म। गृहस्थजीवनसम्बद्धविषयेषु तासां योग्यत्वम् अभीष्टमासीत्। इयं शिक्षा यथा नाराणां हितसाधिका वर्तते तथैव नारीणामपि। प्राचीनकाले नराणां शिक्षाविषये समाजः अतीव जागरूकः आसीत्। अस्मिन् विषये अनसूया – देवहूति – शुची – गोधा – यमी – घोषा – उर्वशी – गार्गी – मैत्रेयी – अदिति – सावित्री – कौसल्या – सीता – तारा – मन्दोदरी – कुन्ती – अहल्यादीनां नारीणां नामानि उदाहरणरूपेण दरीदृश्यन्ते। मन्त्रदर्शनेन तासां गौरवं वैदुष्यम् आदर्शरूपत्वं च परिलक्ष्यते।

[3] पञ्च.३.१४६

**नारीणाम् अधिकाराः –**

नारी समाजस्य आधारशिला विद्यते। नारी पुरुषस्य सहयोगिनीरूपेण अवर्तत। सा पुरुषैः सह यज्ञादिकर्माणि सम्पादयत्। भीषणे समरेऽपि सा सेनानीत्वम् अलंचकार।

**संहोत्रं स्म पुरा नारी समनं वाव गच्छति॥**[4]

**इन्द्राण्येतु प्रथमाजीतामुषिता पुरः॥**[5]

युद्धक्षेत्रेऽपि नारीणां महत्त्वं पुरुषापेक्षया न्यूनं न दृश्यते। भरतस्य मातुः कैकेय्याः रणकौशलं सुविदितमेव। आधुनिकयुगे लक्ष्मीबाई, जीजीबाय्या प्रभृतयो नार्यः स्वकीयानां रणकौशलानाम् अतीवप्रदर्शनं चक्रुः। वेदेषु नारी न अबला इति मन्यते। सा सुवीरा शूरपत्नी, इन्द्रपत्नी इत्यादिभिः पदैः गौरवेण उद्घुष्यते।

**आवीरामिव मामयं शारारुरभि मन्यते।**

**उताहमस्मि वीरिणीन्द्रपत्नी॥**[6]

स्त्रियः सौभाग्यवतीत्वं सहृदयत्वम् उद्यमित्वं च प्रशास्यते। यथा –

**न मत् स्त्री सुभसत्तरा न सुयाशुतरा भुवत्॥**[7]

नारी यथावसरं संसद्यपि भाषणादिकं व्यधधात्। यथा –

**वशिनी त्वं विदथमा वदासि॥**[8]

**सा गार्हपत्यकर्मणि जागरूकाऽभूत्, पुत्रादिलाभेन समृद्धिं चागच्छत॥**[9]

---

[4] अथर्ववेदः – २०.१२६.१०

[5] अथर्ववेदः – १.२७.४

[6] अथर्ववेदः – २०.१२६.९

[7] अथर्ववेदः - २०.१२६.६

[8] अथर्ववेदः -१४.१.२०

**नारीणां कर्तव्यम् –**

काव्यप्रकाशकारः काव्यप्रयोजनप्रसङ्गे भणितं यत् कान्तासम्मित उपदेशेऽपि काव्यस्य प्रमुखं प्रयोजनं वर्तते। उपदेशः त्रिविधः – प्रभुसम्मितः, सुहृत्सम्मितः, कान्तासम्मितश्च। एतेषु त्रिषु उपदेशेषु कान्तासम्मितोपदेशः सुखकरः, हृदयग्राह्यः, व्यवहार्यः, कमनीयाश्च भवति। सा भोजनकाले मार्तृकार्यं करोति, कार्याकार्यविचारकाले सन्मन्त्राः प्रदाय मन्त्रिकार्यं करोति, पतिसेवाकाले च दासीरूपेण व्यवहरति। उपदेशस्य अनेन भेदेन अग्राह्यमपि तथ्यं सुग्राह्यं भवति। उक्तञ्चास्ति –

**कार्येषु दासी करणेषु मन्त्री भोज्येषु माता शयनेषु रम्भा।**

**धर्मेऽनुकूला क्षमया धरित्री भार्या च षडगुण्यवतीह दुर्लभा।।** [10]

नारीणाम् आचारशुद्धिः, जागरूकत्वम्, सुसन्ततियुक्तत्वं च आभीष्यते।

**शुद्धाः पूता योषितो यज्ञिया इमाः।।**[11]

सुसन्तानोत्पत्त्या राष्ट्रहितसम्पादनमपि नारीणां कर्तव्यम् तथा हि दृश्यते –

**इदं राष्ट्रं पिपृहि सौभगाय।।**[12]

अथर्ववेदे स्त्रीगुणानामपि वर्णनं प्राप्यते। सा तेजोवती, कुलपा, पतिहितकारिणी, मृदुभाषिणी, सरला, अक्रोधना, पतिव्रता, अज्ञाकारिणी, प्रसन्नचित्ता च स्यात्।

**पत्याऽविराहधयन्ती।।**[13]

---

[9] अथर्ववेदः १४.१.२१, ७.३५.१

[10] सु.र.भा. ३५१.२७

[11] अथर्ववेदः – ६.११२.५

[12] अथर्ववेदः -७.३५.१

[13] अथर्ववेदः – २.३६.४

**जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्॥**[14]

**पत्युरनुव्रता भूत्वा सं नह्यस्वामृताय कम्॥**[15]

स्त्रीपुरुषौ गृहस्थरूपस्य यानस्य द्वौ चक्रौ स्तः। नारी समाजस्य पोषणं करोति। सा शैशवात् मृत्युपर्यन्तं तेन सह निवसति तं पोषयति च। बाल्यावस्थायां मातृरूपेण तस्य पोषणं करोति, देशाय एकवीरयोद्धां सज्जीकरोति च। युवावस्थायां भार्यारूपेण सहयोगं प्रददाति। वृद्धावस्थायाम् एव सर्वातिशयप्रेम्णा मानवं शान्तिं ददाति। दम्पत्योः हृदयसामञ्जस्यं स्यात्। यथोच्यते –

**प्रजावती वीरसूर्देवकामा स्योनेममग्निं गार्हपत्यं सपर्य॥**[16]

**यतस्त्रुचा मिथुना या सपर्यतः॥**[17]

**सं वां भगासो अग्मत तं चित्तानि समु व्रता॥**[18]

**वेदेषु ब्राह्मणग्रन्थेषु च नारीणां स्वरूपम् –**

भारतवर्षे यत्र एकतः गार्गीमैत्रेयलोपामुद्रासदृशाः परमविदुष्यः स्त्रियः समुत्पन्नाः तत्रैव सीता – सावित्री – दमयन्ती – द्रौपदी – शकुन्तलासमाः पुण्यश्लोकाः पतिव्रतनिष्ठाः नार्यः सञ्जाताः। वेदेषु शतपथब्राह्मणादिग्रन्थेषु च स्त्रीस्वरूपं यथास्थानं प्रतिपाद्यते। तत्र स्त्रीविषये काश्चन विशिष्टताः निर्दिश्यन्ते। तत्र स्त्री सावित्रीरूपेण गौरवास्पदं प्रतिपाद्यते। नारीणां पतिरेव गतिः।

[14] अथर्ववेदः – ३.३.२

[15] अथर्ववेदः – १४.१.४२

[16] अथर्ववेदः – १४.२.१८

[17] अथर्ववेदः – २.२५.३

[18] अथर्ववेदः – २.३.२

पतिवर्त्मानुसरणं तासां कर्तव्यम्। ताः कोमलाङ्गत्वाद् अबलाः। न च तास्ताडनीयाः। प्राचीनभारते नारीणां स्थानं महत्त्वपूर्णमासीत्। तद्यथा –

**स्त्री सावित्री॥**[19]

**पतयो ह्येव स्त्रियै प्रतिष्ठा॥**[20]

**तस्मात् स्त्रियः पुंसोऽनुवर्त्मानो भावुकाः॥**[21]

**अवीर्या वै स्त्री॥**[22]

**न वै स्त्रियं घ्नन्ति॥**[23]

**तस्मै नमन्तां जनयः सुपत्नीः॥**[24]

**इडामकृण्वन् मनुष्यस्य शासनीम्॥**[25]

**सुमंगली प्रतरणी गृहाणां सुशेवा पत्ये श्वशुराय शम्भुः॥**[26]

नारी जगतोऽस्य सर्जनात्मिका नारी पत्युः अर्धाङ्गरूपा। वैदिकविवाहस्य अविच्छेद्यत्वं च प्रतिपाद्यते। जाययैव मानवस्य पूर्णत्वं संजायते। यथा –

**वरुण्यं वा एतत् स्त्री करोति यन्यस्य सत्यन्येन चरति॥**[27]

---

[19] जै.ब्रा.४.२७.१७

[20] शत.ब्रा. २.६.२१४

[21] शत.ब्रा.१३.२.२.४

[22] शत.ब्रा. २.५.२.३६

[23] शत.ब्रा.११.४.३.२

[24] यजुर्वेदः – १२.३५

[25] ऋग्वेदः – १.३१.११

[26] अथर्ववेदः – १४.२.२६

**अथो अर्धो वा एष आत्मनः, यत् पत्नी॥**[28]

**अयज्ञो वा एषः। योऽपत्नीकः॥**[29]

**सा होवाच – यस्मै मां पिताऽदात्, नैवाहं तं जीवन्तं हास्यामीति॥**[30]

**जाया गार्हपत्योऽग्निः॥**[31]

**यावद् जायां न विन्दते नैव तावत् प्रजायन्ते, असर्वो हि तावद् भवति॥**[32]

**स्मृतिग्रन्थेषु नारीणां स्थानम् –**

स्मृतिग्रन्थेषु नारीणां स्वरूपम् अत्युत्कृष्टत्वेन प्रतिपाद्यते। यत्र नारीणां समादरस्तत्रैव सर्वक्रियाणां साफल्यम्। नारीणां भूषणाच्छादनादिभिः सत्कृत्यै सततमेव सत्क्रिया विधेया। यथा –

**तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।**

**भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च॥**[33]

योषिति सन्तुष्टिमुपागतायां प्रसन्नायां च सत्यां तत्कुलं रोचते वर्धते च। यथा –

**स्त्रियां तु रोचमानायां सर्वं तद् रोचते कुलम्।**

**तस्यां त्वरोचमानायां सर्वमेव न रोचते॥**[34]

---

[27] शत.ब्रा.२.५.२.२०

[28] तैति.ब्रा. २.२.२.६

[29] तैति.ब्रा. २.२.2.६

[30] शत.ब्रा. ४.१.५.९

[31] ऐत.ब्रा. ८.२४

[32] शत.ब्रा.५.२.१.१

[33] मनु – ३.५९

[34] *मनु.३.६२*

यत्र दम्पत्योः सामञ्जस्यं परस्परसन्तुष्टिश्च तत्रैव कल्याणाधिवासः। यथा –

***सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।***

***यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥***[35]

स्त्रियो रत्नानि विद्या धर्मश्च यत्रैव प्राप्येरन्, तत एवोपादेयानि। यथा –

***स्त्रियो रत्ना यथो विद्या धर्मः शौचं सुभाषितम्।***

***विविधानि च शिल्पानि समादेयानि सर्वतः॥***[36]

अस्माकं धर्मशास्त्रे अपि स्त्रियः समस्तास्तव देवि भेदाः इति वचनानुसारेण सर्वा स्त्रियः महद्मायायाः आद्याशक्तेः स्वरूपेणैव प्रतिपादिताः। पुराकाले स्त्रियः गृहिणी, गृहस्वामिनी, सहधर्मिणी, इत्यादिभिः विशेषणैः सम्बोध्यन्ते स्म।

***रामायण – महाभारतकाले नारीणां स्थितिः –***

रामायण – महाभारतकाले नारीणां शिक्षायाः सुव्यवस्था परिलक्ष्यते। रामायणे कौसल्या तारा च मन्त्रविदौ कथ्येते। सन्ध्या कुर्वन्त्या जानक्याः वर्णनं प्राप्यते। महाभारते सुलभा वेदान्तविद् वर्ण्यते। द्रोपदी च पण्डिता कथ्यते। नारीणां सङ्गीतनृत्यादिकलानां शिक्षणं वर्ण्यते, अर्जुन उत्तरां तद्गृहे एव सङ्गीतनृत्यादिकम् अध्यापयामास। रामायणे एकपत्नीव्रतं प्रतिपाद्यते। महाकाव्यकाले नारीणां गौरवं प्रतिष्ठितम् आसीत्। महाभारते वर्ण्यते यत् सत्कृता नार्येव लक्ष्मीर्भवति। महाभारते नारीणां गौरवं प्रति निम्नश्लोकः उद्धृतोऽस्ति –

***अर्धभार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा।***

---

[35] *मनु.३.६*

[36] *मनु. २.२४*

*भार्या मूलं त्रिवर्गश्च भार्या मूलं तरिष्यतः॥*

*भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः।*

*भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विताः॥*

*सखाय प्रविविक्तेषु भवन्त्येताः प्रियंवदाः।*

*पुरा नार्यः पुरुषतुल्यमधिकारान् लेभिरे॥*[37]

सन्दर्भग्रन्थसूची


i. (ऋग्वेद- प्रातिशाख्यम् ), वर्मा वीरेन्द्रकुमार, चौखाम्बा संस्कृतसंस्थानम् : दिल्ली, २०११॥

ii. (ऋग्वेद (प्रथमद्वितीयतृतीयचतुर्थभागाः), मनोज वेदान्ततीर्थ, मनोजपब्लिकेशन्स : दिल्ली २०१५०॥

iii. (ऋक्सूक्तसंग्रहः), शास्त्री हरिदत्त , साहित्यभाण्डार : मेरठ॥

iv. (अथर्ववेद में नारी), द्विवेदी पारसनाथ, चौखाम्बा सुरभारती प्रकाशनम् : वाराणसी २०११ – १२॥

v. (वैदिकसाहित्य एवं संस्कृति ), द्विवेदी कपिलदेव, विश्वविद्यालय प्रकाशनम् : वाराणसी २०१००॥

vi. (ब्राह्मणग्रन्थ का विषय), पाण्डेयविजयशङ्कर, अक्षयवट प्रकाशनम् : इलाहबाद २०११॥

vii. आचार्यः ,(सम्पादकः) श्रीरामशर्मा ,"श्रीमद्भागवतम्"१९९२दिल्ली ,सुन्दरसिंहाचार्यप्रकाशनः ,

viii. (शतपथ ब्राह्मण), सरस्वती सत्यप्रकाश,स्वामी हासानन्द गोविन्दराम विजयकुमार, दिल्ली २०१४॥

ix. वासुदेवानन्दः, स्वामी (अनुवादकः व्याख्याकारश्च),"*श्रीमद्भगवद्गीता*"(बङ्गपुस्तकम्), कलिकाता, उद्बोधन-कार्यालयः, २०१४।


[37] *महाभारतम्*


x. वन्द्योपाध्यायः, शास्त्री मानवेन्दुः, (अनुवादकः सम्पादकश्च), "मनुसंहिता" संस्कृतपुस्तकभाण्डार, कलिकाता, तृतीयसंस्करणम्। २०१६।

 ISSN 2320-2025

# भगवद्गीतास्वामिनारायणभाष्यवैशिष्ट्यम्

**हरप्रिया बेहेरा**

**शोधच्छात्रा**

**श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः**

**नवदेहली।**

जिज्ञासा मानवस्य नैसर्गिको गुणो विद्यते। जिज्ञासा मानवस्य बौधिकविकासस्य कारणमित्यऽपि वक्तुं शक्यते। भारतीयदर्शनपरम्परायाः आरम्भमपि जिज्ञासया एव भवति। अस्यामेवश्रृंखलायाम् अद्वैतसम्बद्धग्रन्थानां प्रारम्भं जिज्ञासया दरीदृश्यते। यथोक्तं- **अथातो ब्रह्मजिज्ञासा**[1]। अतः वक्तुं शक्यते यत् कस्मिन्नपि विषये प्रवेशात् प्राक् "जिज्ञासा" इति घटकतत्वरूपेण सिद्ध्यते। सम्प्रति भाष्यलेखनविषयेऽपि जिज्ञासा समुपजायते यत् भाष्यं किमर्थं विरच्यते? यतोहि भारतीयज्ञानपरम्परायां भाष्यस्य प्रचलनं प्राचीनकालादेव प्रारब्धम्। यथा देश-काल-परिथित्यनुगुणं धर्मस्य व्याख्या परिवर्तिता भवति। अधिकरी भेदेऽपि धर्मस्य व्याख्यायाः परिवर्तनं दृश्यते। उपनिषद् प्रमाणं भवति यत् एकस्य उपदेष्टुः उपदेशः त्रिभ्य अधिकरीभ्यो त्रिप्रकारकैः अवभाषते। यथा दा इत्यस्य शब्दस्य कश्चनः दानं, कश्चनः दमनं अन्यकश्चनः दया इति स्वीकरोति। अतः मन्ये भाष्याणां विभिन्नता बुद्धिवैशद्यम् अथवा अधिकार्यनुगुणं भवति। एवमपि वक्तुं शक्यते यत् भाष्यं शब्दानां एकं विशिष्टरूपं, लक्ष्यं तु सर्वेषामेकमेव, "सत्यं ज्ञानमनन्तमानन्दं ब्रह्म"। कस्यापि ग्रन्थस्य लेखनस्य किमपि प्रयोजनं भवति। यतो हि सर्वविदितमिति यत् कस्यचिद् कार्यस्य कारणमवश्यमेव स्वीक्रियते। यथोक्तं न्यायमञ्जर्यां – "प्रयोजनमुदिश्य मन्दोऽपि न प्रवर्तते"। अपि च संस्कृतवाङ्गमये लक्षणस्य

---

[1] ब्रह्मसूत्र- १.१.१

विशेषमहत्त्वं वर्तते। लक्षणेन कस्यापि शब्दस्य सिद्धिः क्रियते। अत्रापि सर्वप्रथमं भाष्यस्य लक्षणं प्रदीयते। यथा- **आक्षिप्य भाषणाद् भाष्यम्**"। पुर्वपक्षत्वेन शङ्कामुत्थाप्य भाषणात् सिद्धान्तपक्षेनोत्तरकथनं यत्र जयते तद् भाष्यमुच्यते। अर्थात् लक्ष्यानुरोधेन नवनियमनिर्माणम्, अन्यथा स्थितस्य खण्डनं व्याख्यानन्तरं च आक्षेपं कृत्वा समीक्षा भवति भाष्ये। अत: इदानीं विचारं क्रियते यत् भगवद्गीताया उपरि बहूनि भाष्याणि विरचितानि, तर्ह्यत्र मनसि प्रश्नः उत्पद्यते यत् अस्य भाष्यस्यापि काऽवश्यकता?, भाष्यलक्षणानुगुणं काऽपि प्रासङ्गिकता अस्ति न वा? का नूतनता? कानि वैशिष्ट्यानि इत्यादयः। प्रस्तुतपत्रे **भगवद्गीतास्वामिनारायणभाष्यवैशिष्ट्यम्** इत्यस्मिन् विषये निरूप्यते।

## किं नाम स्वामिनारायणभाष्यम्

स्वामिनारायणभाष्यं प्रस्थानत्रयीमाधारीकृत्य लिखितं एकस्य अपूर्वचिरसत्यस्य अलौकिकसिद्धान्तस्य अनुसन्धानम्, यदस्माकं वेदादि शास्त्रे निहितमासीत्। भाष्यमिदं तत् परमसत्यं जनमानसं प्रापयितुं एकं राजमर्गम्, संसाररूपभवसमुद्रतरणार्थं एका तरिणी, मायामोहान्धकारात् प्रकाशपर्यन्तं नीयमाना आशाज्योति:, आत्यन्तिकदु:खनिर्वृते: महौषधि इति वक्तुं शक्यते। भाष्यमिदं अक्षरपुरुषोत्तमसिद्धान्तस्योपरि आधारितम्। अक्षरपुरुषोत्तमसिद्धान्तस्य प्रतिष्ठापक: परब्रह्मपूर्णपुरुषोत्तमस्वामिनारायणमहाराज:। तेषां भगवद्पादानां महदुद्देश्यानां दृढीकरणार्थं, सिद्धान्तरक्षार्थं, परम्परारक्षणार्थं लिखितमिदं भाष्यम्। भाष्येस्मिन् प्रयुक्तं शब्दावलीं, गूढविषयाणां संक्षिप्तसरलसुबोधभाषया प्रतिपादनं दृष्ट्वा प्रतीयते कोऽपि साधारणव्यक्तिविशेषस्य कर्यं भवितुं नार्हति। एतादृशस्य असाधारणव्यक्तिविशेषस्य अप्रतिमप्रतिभाया: अन्वेषणं एक: उत्तमगुरु: कर्तुं पारयति। तादृशा: गुरव: आसन् परमपूज्या प्रमुखस्वामिमहाराज:। तेषामेव आज्ञया प्रेरणया लिखितमिदं स्वामिनारायणभाष्यम्। अत: स्वामिनारायणभाष्यस्य भाष्यकार: न केबलं प्रतिभासम्पन्न उत्तमशिष्य: अपितु दैविशक्तिसम्पन्ना:, मधुरभाषी, साधुपरंपराया अग्रगण्या:, भारतीयशास्त्राणां प्रौढमनीषि:, भारतीयदर्शनस्य समीक्षक:, भारतीयतत्वज्ञानस्य अनुसन्धाता। ते सन्ति साक्षात् अक्षरब्रह्मरूपसाधुभद्रेशदासमहाभागा:। तै:

प्रस्थानत्रयीमाधारीकृत्यलिखितं स्वामिनारायणभाष्यं पञ्चपुस्तकानां समाहारः। तद्यथा- १. ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम्, २. बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्, ३. छान्दोग्योपनिषत्स्वामिनारायणभाष्यम्, ४. श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्, ५. ब्रह्मसूत्रस्वामिनारायणभाष्यम्। एतेषु प्रकृतपत्रे "श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्" इत्यस्मिन् विषये विचाराः प्रस्तूयन्ते।

## श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

भाष्यकारस्य भाषयां श्रीमद्भगवद्गीता एका ऐतिहासिक- रोमाञ्चकारीघटना, एका समयातीत-सार्वकलिक-मार्गदर्शिका, जीवदशातः ब्रह्मदशायां रूपान्तरकारीणि एकं दिव्यं रसायनम्, जीवनं सरसं समृद्धं च कारयितुमेकं अध्यात्ममन्थनम्, व्यक्तिशान्तेः विश्वशान्तिपर्यन्तं नीयमाना एका अमृतचिन्तनधारा, अपि च विषादं प्रसादे परिवर्तयितुं एका शक्तिः, अकर्मण्यतां मनसि निष्काष्य कर्मष्ठायाः प्रतिपादनरूपराज्याभिषेकस्य एकः भव्योत्सवः[2] इति भाष्यकारेण स्वयमुक्तम् एकस्मिन् व्याख्याने। एतादृशीगीतायाः भाष्यकरणम् अत्यन्तं विद्वत्ततापूर्णं कार्यं कठिनं च। स्वयं लिखितं भष्यकारैः-

क्व गीताग्रन्थोऽयं गहनसुगभीरः श्रुतिसमः

क्व हन्ताऽस्मद्बुद्धिः प्रकृतिजडपङ्केन मलिना ।

तथापि प्रज्ञा तु परमगुरुकारुण्यसुलभा

कटाक्षः पर्याप्तः प्रमुखनयनोद्भूतसरसः ॥[3]

श्रीमद्भगवद्गीतास्वामिनारायणभाष्यं परब्रह्मस्वामिनारायणप्रबोधित् अक्षरपुरुषोत्तमदर्शनप्रतिपादकं शास्त्रम्। स्वात्मानं अक्षरं विभाव्य पुरुषोत्तमस्य भक्तिः कर्तव्या इति मुख्यसिद्धान्तः। स्वात्मनि अक्षरब्रह्मगुणान् कथं प्राप्तव्यम् इति प्रश्नम्? ब्रह्मप्राप्तिरुपायाः

---

[2] महामहोपाध्यायसाध्युभद्रेशदासमहोदयानां व्याख्यानम्

[3] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम् भूमिका

विभिन्नेषु दर्शनेषु भिन्नरूपेण प्रतिपादितम्। अत्रापि भगवद्गीतायां श्रीकृष्णेन संपूर्णं समाजमुपलक्ष्य अर्जुनं प्रति यदुपदेशं दत्तं तत् साधुभद्रेशदासमहाभागै: स्वस्मिन् भाष्ये श्रीमद्भगवद्गीतास्वामिनिनारायणभाष्ये अक्षरपुरुषोत्तमसिद्धान्तरूपेण अवबोधयति यत्-कुरुक्षेत्रयुद्धसमये अर्जुनस्य या स्थिति: आसीत्, अद्यतनसमाजे जनानां सर्वोपरि युवानां सा स्थिति: दरीदृश्यते। ते उत्तमनिर्णयनेतुमसमर्था:। तटस्थता सर्वदा आगच्छति तेषां जीवने। किं उत्तमं किं न, किं करणीयं किं न, कुत्र प्रवृत्ति: कुत: निवृत्ति: इत्यादिषु विषयेषु विचारशून्यं भूत्वा अग्रे न गच्छन्ति। अग्रिमफलस्य परिकल्पनेन भाविनिकाले असफलतां समायाति इति मत्वा कार्यस्य प्रारम्भमेव न कुर्वन्ति। एतादृशे: स्थिते: परिहाराय अर्जुनसदृशानां समस्तजनानां समस्तशंकासंदिग्धताया: निवारणाय, विषादं प्रसादेन परिवर्त्तनाय भगवद्गीतास्वामिनारायणभष्येस्मिन् प्रतिपादितं धर्म:[4],योग[5]:,ब्राह्मीस्थिति:[6], स्थितप्रज्ञता[7], ज्ञानि[8], प्रियभक्त:[9], अक्षरब्रह्म परब्रह्मयोर्मध्ये भेद:[10], गुणातीतादि विशेष विषया:[11] अतिमहत्वपूर्णस्थानमलंकरोति।

## भगवद्गीतास्वामिनारायणभाष्यवैशिष्ट्यानि

विषयोऽयं भगवद्गीतास्वामिनारायणभाष्यवैशिष्ट्यं पक्षद्वयेन विभक्तुं शक्यते। १. बाह्यपक्ष: आन्तरिकपक्षश्च। बाह्यपक्षत्वेन भाष्येस्मिन् प्रतिपादितं भाषाशास्त्रीयाध्ययनं, साहित्यिकाध्ययनं, व्याकरणदृष्ट्याध्ययनं, भाष्यलेखनशैलीदृष्ट्याध्ययनम् इत्यादि पक्षा: समुद्भवन्ति। आन्तरिकपक्षेस्मिन भाष्यस्य प्राणतत्वं नाम दार्शनिकपक्ष: आगच्छति। आदौ बाह्यपक्षस्य विचार: क्रियते।

### १. मङ्गलाचरणविधानम्-

[4] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता २.४०, पृ. ४२-५०
[5] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता २.३९, पृ. ३८-४२
[6] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता २.७२, पृ. ६८-६९
[7] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता २.५५- ७२, पृ ५९-६९
[8] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता ७.१८- १९, पृ १६५-६६
[9] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता १२. १३-२० पृ २७२- ७५
[10] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता
[11] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता १४.२०

निर्विघ्नपरिसमाप्त्यर्थं मङ्गलाचरणविधानस्य एका विशिष्टा परम्परास्त्यस्माकं संस्कृतवाङ्मये। मङ्गलाचरणस्य अनिवार्यतां दर्शयन् महाभाष्यकारेणापि उक्तम्- मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत् पुरुषाणि चाऽध्येतारश्च मङ्गलयुक्ता यथा स्युरिति ।

तामेव परम्परामनुसृत्य अत्रापि साधुभद्रेशदासमहाभागैः मङ्गलाचरणं विहितं ग्रन्थादौ-मध्ये-अन्ते च। तद्यथा ग्रन्थादौ

मङ्गलं सहजानन्दः श्रीहरिर्मङ्गलं शुभम् ।

मङ्गलं नीलकण्ठो हि स्वामिनारायणः सदा ॥[12]

मध्ये यथा-

सर्वाऽमङ्गलनाशाय सर्वमङ्गलप्राप्तये

सर्वमङ्गलरूपाय गुरवे हरये नमः ॥

योऽन्तः प्रविश्य गीतावाग्विस्तरं तनुते भृशम् ।

नौमि तमक्षराधीशं स्वामिनारायणं प्रभुम् ॥[13]

अन्ते यथा-

नमोऽस्तु सहजानन्दस्वामिने ह्यवतारिणे ।

नारायणस्वरूपाय गीताभाष्यान्तपर्वणि ॥[14]

---

[12] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम् पृ.सं- ३७४-७५

[13] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम् पृ.सं- २००

[14] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम् पृ.सं- ३

२. **भाष्यलेखनशैल्यनुगुणं भाष्यं-**

भाष्यलेखनस्य काचित् शैली वर्तते। भाष्यलक्षणानुगुणं भाष्यं लेखनीयं भवति। यथास्ति शब्दकल्पद्रुमे-

**सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारीभिः**

**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।**

अर्थात् भाष्यं केवलं सूत्रार्थस्य वर्णनं न अपितु सूत्रार्थकरणे यानि नूतनपदानि आगच्छन्ति, तेषामपि व्याख्या कर्तव्या। अपि च काव्यमीमांसाकारेणोक्तं – **आक्षिप्य भाषणात् भाष्यम्।** भाष्यलक्षणानुगुणं भाष्येस्मिन् साधुभद्रेशदासाचार्यैः स्वयमेव पूर्वपक्षेत्वेन आक्षेपं कृत्वा तस्य निराकरणमपि कृतम्। यथा द्रष्टुं शक्यते **"ननु", "कथमिति", "न च"** इत्यादि शब्देन[15]।

३. **अध्यायानां नामान्तरकरणम्-** इतोपि अन्यमेकं वैशिष्ट्यं केचनाध्यायानां नामान्तरकरणम्। अनेन विशेषनामकरणेन न केवलं भाष्यस्य वैशिष्ट्यं सिद्ध्यति अपितु अध्यायेषु प्रतिपादितं अक्षरपुरुषोत्तमदर्शनस्य स्पष्टावगमनं भवति अध्यायस्य नामश्रवणेन। तद्यथा- ब्रह्मस्थितियोग-अवतारयोग-अक्षरब्रह्मयोग-शरणागतियोगः[16]। यथा परमात्मा सर्वव्यापकः, सर्वसमुत्कृष्टः वर्तते, केषुचित् दर्शनेषु अयं परमात्मा सदा साकारः वर्तते, सर्वकर्ता परमात्मा इति तत्र तत्र अङ्गीकृतमस्ति परन्तु अस्मिन् अक्षरपुरुषोत्तमदर्शने परमात्मा पुरुषोत्तमः सदैव प्रकटः वर्तते। न केवलम् अवतारसमये अपितु तेषां प्राकट्यं इह वर्तते इति अक्षरपुरुषोत्तमदर्शनस्य दर्शनान्तरेभ्यो वैलक्षण्यम् इति अवतारयोगात् अवगन्तुं शक्यते।

४. **सन्दर्भानुगुणं पारिभाषिकशब्दानां एकत्र प्रस्तुतिकरणम् -** पारिभाषिकशब्दानां सहजावबोधाय चमत्काररूपेण सन्दर्भानुगुणं प्रस्तुतिकरणं भाष्यस्य अन्यमेकं वैशिष्ट्यम्। यथा द्रष्टुं शक्यते द्वितीय-चतुर्थ- षष्ठ-सप्तम-अष्टम- नवम-दशम-द्वादशाध्यायेषु योगशब्दस्य, धर्मशब्दस्य च सन्दर्भानुगुणं उद्देश्यपूर्त्यर्थं प्रस्तुतिकरणम्-

---

[15] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता ८.३, १०.३ पृ. सं- १७३, २२२

[16] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- अनुक्रमणिका

अथ प्रसङ्गाद् धर्मशब्दो विमृश्यते । धर्मशब्दस्य शास्त्रेऽस्मिन् द्वेधा प्रयोगः । प्रथमस्तावद् वर्णाश्रमादिधर्मतया , द्वितीयश्च परमात्मस्वरूपनिष्ठात्वेन चेति । तत्र ' कुलधर्मा .... ' ( गी . १/४० ) , ' धर्मे नष्टे ' ( गी .१ / ४० ) , ' अधर्माभि भवात् ' ( गी .१ / ४१ ) , ' जातिधर्मा : ' ( गी .१ / ४३ ) , ' कुलधर्मा : ' ( गी .१ / ४३ ) इत्यादिषु वर्णाश्रमधर्मोपलब्धिः ।

' स्वल्पमप्यस्य धर्मस्य ' ( गी . २/४० ) , ' यदा यदा हि धर्मस्य ' ( गी .४ / ७ ) , ' धर्मसंस्थापनार्थाय ' ( गी .४ / ८ ) , ' प्रत्यक्षावगमं धर्म्यम् ' ( गी.९ / २ ) , ' धर्मस्यास्य परन्तप ' ( गी.९ / ३ ) , ' धर्म्यामृतम् ' ( गी .१२ / २० ) , ' धर्म्यं संवादम् ' ( गी .१८ / ७० ) इत्यादौ हि परमात्मस्वरूपनिष्ठारूपधर्मोपलब्धिरिति विवेकः । तदिह ' स्वल्पम प्यस्य धर्मस्य ' इत्यनेन त्वस्य धर्मस्येति पूर्वोक्तयोगशब्दार्थतया परामृष्टस्य धर्मशब्दस्य परमात्मास्वरूपनिष्ठार्थत्वमेव प्रतिपादितम्।[17]

५. **<u>पूर्वापरप्रसङ्गप्रस्तुतिकरणं</u>-** अर्थात् पूर्वाध्यायेन सह प्रस्तुताध्यायस्य क: सम्बन्ध:, प्रकृताध्याये केषां विषयाणां प्रस्तुति: क्रियते इति भूमिकारूपेण प्रसङ्गप्रस्तुतिकरणम् अन्यमेकं वैशिष्ट्यं भवति। येन विषयावगमने स्पष्टता भवति। यथा द्वितीयोऽध्यायस्यारम्भे-

" स्वात्मब्रह्मरूपत्ववैधुर्याद् विभूतिवरश्रीकृष्णसहायोऽपि पार्थो मोहमुद् गराऽभिहतो विषादं गतः कर्तव्यादपि युद्धाद् विररामेत्युक्तं प्राक् । इदानीं विषादापनोदनविषयो निरूप्यते । रथोपस्थ उपविष्टं तत्सारथिः किमभिदधाविति धृतराष्ट्रजिज्ञासायां सञ्जय आह तमित्यादि ।"[18] अनेन प्रकारेण प्राय: प्रत्येकाध्यायस्यारम्भे द्रष्टुं शक्यते।

६. **संक्षेपात्मकसारकथनम्-** प्राय: प्रत्येकाध्यायस्यान्ते संक्षेपेणसारकथनं भाष्यस्य अन्यमेकं वैशिष्ट्यं भवति। अनेन न केवलं भाष्येस्मिन् प्रतिपादितं मुख्यविषयाणां ज्ञानं भवति

---

[17] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता २.४० पृ.सं- ४२- ५०

[18] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता, पृ. सं-१८

अपितु भाष्यकरस्य पाठोद्देश्याणां पूर्त्यर्थं सचेतनतायाः प्रमाणं प्राप्यते। यथा द्वितीयोऽध्यायस्यान्तिमे[19], तथैव अष्टमोऽध्यायस्यान्ते[20], अष्टादशोऽध्यायस्य ५४ श्लोके च द्रष्टुं शक्यते- यथा-

"यद् द्वितीये स्थितप्रज्ञलक्षणैः पञ्चमे जीवन्मुक्तलक्षणैः षष्ठे योगिलक्षणैः , सप्तमे ज्ञानिलक्षणैः , द्वादशे प्रियभक्तलक्षणैः चतुर्दशे वा गुणातीतलक्षणैर्बहुधा निरूप्योपपादितं , यच्चाऽन्यत् परब्रह्मप्रसन्नतैकप्राप्या ऽऽत्यन्तिककल्याणाय साधनजातमुक्तं समग्रासु गीतासु , तत्सर्वमप्यत्र स्वोदरीकृतसर्वसाधनेन सकलाऽध्यात्मयत्नसारभूतेन त्वेकेन शब्देनैव संग्रथितं ' ब्रह्मभूतः ' इति । इत्थम् ' एषा ब्राह्मी स्थिति : ' ( गी .२ / ७२ ) इत्युपदेशोपक्रम उपस्थापितोऽक्षरब्रह्मभाववैभवो ह्येतावत्पर्यन्तमनुस्यूततया भूयो भूय प्रतिपादित इति तस्याऽपरिहेयतां परमावश्यकतां च विज्ञापयति ॥"[21]

७. **अपाणिनीयप्रयोगाभाव:** अर्थात् भाष्यकारेण "मुखं व्याकरणं स्मृतं" इति व्याकरणस्य महत्वं मनसि निधाय भाष्येस्मिन यथास्थानं प्रयोगं कृतं। यथा द्रष्टुं शक्यते युधिष्ठिर: इति शब्दस्य कृते कथं भाष्येस्मिन् पाणियीयप्रयोग: विहितमस्ति। ``**कुन्तीपुत्रः पृथातनयो युधिष्ठिरो युधि संग्रामे स्थिरत्वाद् युधिष्ठिरः । हलदन्तात्सप्तम्या : संज्ञायाम् ' ( पा.सू .६ / ३ / ९ ) इत्यलुक् । ' गवियुधिभ्यां स्थिर : ' ( पा.सू .८ / ३ / ९ ५ ) इति षत्वम् ।**"[22]

**तथैव राजविद्या- इदं मयोपदिश्यमानं ज्ञानमेव राजविद्या विद्यानां राजा इति विग्रहः । ' राजदन्तादिषु परम् ' ( पा.सू . २/२/३१ ) इत्युपसर्जनस्य पूर्वनिपातः । सर्वासु विद्यासु या श्रेष्ठा सा राजविद्येत्येर्थः । सा च अध्यात्मविद्यैव । वक्ष्यति च विभूत्यवसरे**

[19] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- पृ. सं-६८-६९
[20] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- पृ. सं-१९७-९९
[21] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता१८.५४, पृ. सं-३५९
[22] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता१.१६, पृ. सं ९

**– ' अध्यात्मविद्या विद्यानाम् ' ( गी .१० / ३२ ) इति ।**[23] अनेन प्रकारेण भाष्येस्मिन् बहुत्र पाणिनिव्याकरणस्य प्रयोगं द्रष्टुं शक्यते।

## ८. साहित्यिकदृष्ट्याध्ययनम्

भाष्येस्मिन् प्रतिपादितं साहित्यस्य मूलभूततत्त्वानां वाच्याद्यर्थचतुष्टयानां सुष्ठु विवेचनं अन्यमेकं वैशिष्ट्यम्। उदाहरणार्थं द्रष्टुं शक्यते प्रथमोऽध्यस्य द्वितीयश्लोके-

दृष्ट्वा तु पान्डवानीकं व्यूढं दुर्योधनस्तदा
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्॥

अत्र प्रयुक्तं **"तु"** इति शब्दस्य व्यङ्ग्यार्थं दर्शयित्वा स्वयं भाष्यकारैः लिखितं- पाण्डवानां भयप्रसङ्गो नास्तीति दुर्योधनस्य भयप्रसङ्गस्तुशब्देन व्यज्यते।[24]

एतानि वैशिष्ट्यानि बाह्यपक्षत्वेन स्वीक्रियन्ते।

**आन्तरिकपक्षः** आन्तरिकपक्षत्वेन भाष्यस्य प्राणतत्वं दार्शनिकपक्षं स्वीकर्तुं शक्यते। तत्रापि जीव- ईश्वर-माया-अक्षरब्रह्म- परब्रम्हेत्येतेषु पंचतत्वेषु विशेषतया अक्षरतत्वस्य सुष्ठुप्रतिपादनं , अक्षरब्रह्म परब्रह्मयर्मध्ये भेदः, जीवाक्षरब्रह्मयोर्मध्ये भेदः, अक्षरब्रह्मरूपप्राप्तिरुपायादि विषयाः अत्यन्तं स्पष्टप्रतिपादनं द्रष्टुं शक्यते। यथा- भगवद्गीतायाः बीजाध्याये अर्थात् अष्टमोध्याये अक्षरपुरुषोत्तमसिद्धान्तस्य सुष्टुप्रतिपादनं दृश्यते। अक्षरपुरुषोत्तमसिद्धान्ताधारेण अक्षरब्रह्मस्तु स्वात्मनि साधकशरीरान्तर्विद्यते। पुरुषोत्तमस्त्वन्यः। अक्षरब्रह्मणि स्थित्वा पुरुषोत्तमस्य प्राप्तिमार्गं भाष्येस्मिन् एवं प्रतिपादितम्- परमात्मप्रत्यक्षस्वरूपयोगलभ्यपरमगन्तव्यस्थानं तत्स्थपरमात्मदिव्यस्वरूपं तत्प्राप्तिसाधनानि तद्गमनपथश्चेत्यादि विनिरूपयितुं प्रवर्ततेयमध्यायः। इतः पूर्वं बहुवारं श्रीकृष्णेन ब्रह्मशब्दस्य उपस्थापनं कृतं यथा- 'एषा ब्राह्मी स्थितिः', (गी२/७२), 'ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्' (गी.४/२४), 'यान्ति ब्रह्म सनातनम्' (गी.४/३१), 'ब्रह्म नचिरेणाधिगच्छति' (गी.५/६), 'ब्रह्मविद् ब्रह्मणि स्थितः'( गी.५/२०), 'स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते' (गी. ५/२१), 'ते ब्रह्म तद् विदुः' (गी.७/२९) इत्यदौ भूयो भूयो ब्रह्म

---

[23] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता९.२ पृ. सं २०१
[24] श्रीमदभगवद्गीतास्वामिनारायणभाष्यम्- गीता१.२ पृ. सं ४

शब्दमाकर्ण्य यथोपदेशं तस्य जीवेश्वरप्रकृतिपरमात्मेतराभिधायित्वमापाततेनुमाय ब्रह्मशब्दवाच्यत्वे संशायितस्तन्निश्चयाय पप्रच्छ किं तद् ब्रह्मेति।

**किं तद् ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम।**

**अधिभूतं च किं प्रोक्तम् अधिदैवं किमुच्यते॥ गी.८/१॥**

प्रार्थितस्य समाधानं प्रयच्छति-

**अक्षरं ब्रह्म परमं स्वभावोध्यात्ममुच्यते। गी.८/३॥**

अत्र साधुभद्रेशदासमहाभागै: भष्येस्मिन् अक्षरब्रह्मपरमात्मनोर्मध्ये भिन्नतां दर्शयित्वा अक्षरब्रह्मतत्वस्य निरूपणं एवं कृतम्- परमं परमात्मातिरिक्तसर्वजीवेश्वरमायातन्मुक्तेभ्य: सर्वदा स्वरूपस्वाभावशक्तिसामर्थ्यादिना परभूतम् अक्षरम् एव ब्रह्म ब्रह्मतत्वमुच्यत इत्यर्थ:। । तथा ह्यक्षरमितिपदेनाऽत्र ब्रह्म व्याख्यातम् । न क्षरतीत्यक्षरमिति सञ्चालनार्थक्षरतेर्नञ्सहकारेण , अश्नुत इत्यक्षरमिति व्यापनार्थाश्नोतेश्च व्युत्पादयन्त्यक्षरशब्दं प्राज्ञाः । तथा च ' अक्षरं न क्षरं विद्याद् अश्नोतेर्वा सरोऽक्षरम् ' इति महाभाष्यस्थेयं वर्णग्रहणार्था द्विविधव्युत्पत्तिः प्रसिद्धा । अत्र साधुभद्रेशदासै: अर्थद्वयेन अक्षरतत्वस्य निरूपणं एवं कृतं-

अदौ संचालनार्थे- न क्षरतीत्यक्षरम्।

अन्यत् व्यापनार्थे- अश्नुत इत्यक्षरम्।

अत: अक्षरतत्वं भवति- स्वरूपस्वभावादिभि: अनादितो मायाप्रकृत्याद्यसंसृष्टत्वेन क्षरणाऽभावात्, चिदाकाशरूपेण प्रकृतितत्कार्याऽनन्तकोटिब्रह्माण्डेषु व्यापनाच्च संसिद्धो ब्रह्मणि अक्षरशब्दार्थसमन्वय:। **अर्थात् परम्ब्रह्मण: न्यूनं जीवात्मन: श्रेष्ठं, क्षरणाभावात् व्यापनाच्च नित्यं सत्यं मायातीतं दिव्यं तत्वम् अक्षरमिति उच्यते।** अत्रोक्तं "**परब्रह्मण: न्यूनं, जीवात्मन: श्रेष्ठमिति"** पदद्वयस्य व्याख्या अपेक्षते । अर्थात् कथं भिन्नोऽयम् अक्षरब्रह्म: अथवा ब्रह्मद्वयं अक्षरब्रह्मपरम्ब्रह्मश्चेति सम्यक् प्रतिपादनं पंचदशाध्याये दृश्यते। जीवात्मन: श्रेष्ठमिति पदस्य व्याख्या एवमस्ति भष्येस्मिन्-

**द्वाविमौ पुरुषौ लोके क्षरश्चाऽक्षर एव च ।**

**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥गी.१५/१६॥**

**क्षरश्चाऽक्षर एव च इति इमौ द्वौ पुरुषौ पुरुषपदवाच्यौ लोके स्त इति त्वं विद्धि। तत्र सर्वाणि भूतानि जीवेश्वरसमूहाः क्षरः इदानीं पूर्वं वा यदा कदापि क्षरणस्वभावाऽचित्संसर्गप्राप्तत्वात् क्षर इति शब्दाभिलप्यानि। एवमचित्संसर्गनिबन्धनोऽयं चेतने क्षरत्वव्यपदेशः। कूटस्थोऽक्षर उच्यते नित्यं प्रकृतिसंसर्गवियुक्तं प्रागुक्तजीवेश्वरसमूहपरभूतमक्षरं ब्रह्म कूटस्थ : कूटः शिलाराशि : पर्वत इव तिष्ठतीति कूटस्थो नित्यं विकाररहिततया निश्चल स्वरूपेणाऽवस्थितमित्यर्थः।**

**अन्यच्च ' क्षरः सर्वाणि भूतानि ' इत्यत्र क्षर इत्येकवचने सत्यपि तद्वाच्योपस्थापनाऽवसरे ' सर्वाणि भूतानि ' इति बहुवचनसद्भावात् क्षराणां बहुत्वं सूचितम् , किन्तु तत्रैव पुनः ' कूटस्थोऽक्षर उच्यते ' इत्यत्र अक्षर इति क्षरशब्दवदेकवचनेऽपि तद्वाच्यव्याख्यानावसरे तु ' कूटस्थः ' इत्येकवचन प्रयोगाद् अक्षरतत्त्वस्य एकत्वमेवाभिप्रेतमिति गम्यते । अत एव अक्षरशब्देन नात्र बहुत्वयुक्ता अक्षरमुक्ता ग्राह्या अपि त्वेकसंख्याकमक्षरं ब्रह्मैव**। अनेन भष्यमाध्यमेन ज्ञायते यत् सर्वाणि भूतानि जीवेश्वरसमूहा: क्षर:। इत्यत्र क्षर इत्येकवचने अस्ति परन्तु तद्वाच्योपस्थापनं बहुवचने भवति सर्वाणि भूतानि इति, अत: क्षराणां बहुत्वं दृश्यते। कूतस्थ: अक्षर: एकवचनप्रयोगात् अक्षरस्तु एक एव नित्यं विकाररहिततया निश्चलस्वरूपेण अवस्थितमिति जीवात्मन: श्रेष्ठोऽयं अक्षरब्रहम्:। पुन: परब्रह्मण: भिन्नं न्यूनं च अक्षरब्रह्म: कथमिति भाष्येस्मिन् प्रतिपादितम्-

**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।**

**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥गी.१५/१७॥**

उत्तमः उत् + तमः यस्मादुत्कृष्टमन्यद् नास्तीति। पुरुषस्तु पुरुषोत्तमस्तु अन्यः भिन्नः। तुशब्दो हि प्रागुक्तेभ्यो जीवेभ्य ईश्वरेभ्य एतेषां क्षरत्वोपचारापादिन्यास्तदावृताया मायायास्तत्सर्वजीवेश्वरमायाभ्यः परभूतादक्षर ब्रह्मणश्च परमात्मनः स्वरूपस्वभावैश्वर्यादितोऽत्यन्तं विलक्षणत्वं द्योतयति। स चाऽयमुत्तम: पुरुष: परमात्मा। एवमिह परमात्मन: सर्वविलक्षणत्वं सर्वोत्कृष्टत्वं सर्वनियामकत्वं सर्वान्तर्यामित्वं च सिद्धम्। पुन: परमात्मन: परब्रह्मण: सर्वोत्कृष्टतां प्रतिपादयति-

**यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।**

**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥गी.१५/१८॥**

यस्माद् हेतौ पञ्चमी । क्षरं बद्धमुक्तजीवेश्वरवर्गम् , अतीतः स्वरूप स्वभावादिभिः अतिक्रम्य स्थितः , अक्षराद् अपि पूर्वोक्तसर्वविधबद्ध मुक्तजीवेश्वरमायादिभ्योऽपि सदैवाऽत्यन्तोत्कृष्टात् साक्षादक्षरब्रह्मणोऽपि , ' अक्षरादपि ' इति अपिकरणेन उत्तमः उत्कृष्टः , अहमस्मि । अत्र बद्धमुक्तजीवेश्वरादिसर्वोत्कृष्टाक्षरब्रह्मणोऽपि पुरुषोत्तमस्योत्तमत्वोक्त्या तन्निरवधिकपरमशक्तिसामर्थ्यविभवः सूच्यते । एवं च सति क्षरातीतत्वं तु कैमुत्यसिद्धमेवेति सिद्ध्यति । अतः एवं ' द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ' ( गी .१५ / १६ ) इति पुरुषशब्दव्यपदिष्टक्षराऽक्षरत उत्तमत्वाद् लोके वेदे च पुरुषोत्तमः इति प्रथितः कीर्तितोऽस्मि ।

## निष्कर्ष:

भगवद्गीतास्वामिनारायणभाष्यस्य पूर्णावलोकनेन वक्तुं शक्यते अनेकै: वैशिष्ट्यै: विशिष्टमिदं भाष्यम्। न केबलं सरलसुबोधस्पष्टभाषया विषयोपस्थापनम् अपितु भाष्यलेखनशैल्यनुगुणं-सन्दर्भानुगुणं-पूर्वापरप्रसङ्ग:-संक्षेपेण-साररूपेण व्याकरणसाहित्यिकदृष्ट्या च अबलोकनेन इतोऽपि भाष्यस्य प्रणभूततत्वस्य अक्षरपुरुषोत्तमदर्शनस्य सुष्टुविवेचनं दृष्ट्वा संस्कृतवाङ्मये भाष्यपुष्परूपकोद्यानस्य "मधु:" इति वक्तुं शक्यते। कस्यापि कर्यस्य पक्षद्वयं भवति। एक: श्रमपक्ष: अपरश्च कलापक्ष:। यथा मधुमक्षिकाया: मधुसंग्रह: भवति श्रमपक्ष:, पुन: तस्य व्यवस्थितरूपेण व्यवस्थापनं भवति कलापक्ष:। तथैव भाष्येस्मिन स्वामिपादै: विहितं व्याकरणादि अंशा: श्रमपक्षे अन्तर्भवति, तत्र कलापक्ष: तु सन्दर्भानुगुणं अक्षरपुरुषोत्तमसिद्धान्तस्य व्यवस्थापनम्।

## सहायकग्रन्था:

1.ईशादि नौ उपनिषद्, गीताप्रेस गोरखपुर, सं, २७३००५.

2.श्रीमद्भगवद्गीता, गीताप्रेस गोरखपुर,सं, १९८२.

3.गीता दर्पण; स्वामी रामसुखदास, गोविन्द भवन कार्यालय, गीताप्रेस गोरखपुर

4.श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्, महामहोपाध्याय: साधुभद्रेशदास:, स्वामिनारायण अक्षरपीठ, अमदावाद

5.भारतीय दर्शन,चन्द्रधर शर्मा, मोतीलाल बनारसीदास,दिल्ली

6.श्रीमद्भगवद्गीता, शान्तिकुमार पाण्ड्या, अम्बालाल प्रजापति, जगदीशभाई जोशी(सम्पा) पार्श्व प्रकाशन, अहमदावाद १९५६.

7.श्रीमद्भगवद्गीता; नरोत्तमपारमेश्वर शास्त्री, जी. एस. शाह, शान्ति कुमार पाण्ड्या (सम्पा.), सरस्वती प्रकाशन, अहमदावाद १९८५.

8.श्रीमद्भगवद्गीता; राधाकृष्णन, राजपाल एण्ड सन, कश्मीरी गेट, नई दिल्ली.

श्रीमद्भगवद्गीता; सी एल. शास्त्री, पी. सी. दवे(सम्पा) अखिल हिन्द प्रकाशन, अहमदावाद.

9. अक्षरपुरुषोत्तमदर्शन, महामहोपाध्याय साधुभद्रेशदास:, स्वामिनारायण अक्षरपीठ, अमदावाद, ३८०००४

10.स्वामिनारायणसिद्धान्तसुधा, महामहोपाध्याय साधुभद्रेशदास:, स्वामिनारायण अक्षरपीठ, अमदावाद

## अन्तरजालीयस्रोतांसि

1. https://hi.wikipedia.org/wiki/
2. https://en.wikipedia.org/wiki/Sanskrit
3. https://archive.org/
4. http://sanskrit.du.ac.in/web/
5. http://sanskrit.jnu.ac.in/index.jsp
6. https://de.wikipedia.org/wiki/Shodhganga
7. https://en.wikipedia.org/wiki/National_Sanskrit_University
8. www.baps.org

# वेदान्तदृष्ट्या कर्म

- **डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः
सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीसदाशिवपरिसरः, पुरी, उत्कलाः
E-Mail – nandiji85@gmail.com

**प्रबन्धसारः -**

दुःखपारावारेऽस्मिन् सर्वोऽपि जीवः सुखमिच्छति । सुखमिच्छता जनेन दुःखं निवारयितुं सुखमवाप्तुं च सर्वात्मना भूयान् प्रयासो विधीयते । कृतेऽपि प्रयत्ने दुःखमेवावशिष्यते संसारस्य दुःखमयत्वात् । सांसारिकसुखं न सुखं भवति तत् दुःखस्वरूपमेव । अविद्यावृत्तकारणात् संसारे दुःखमपि सुखायते । तस्मात् परमसुखरूपा मुक्तिः एव जीवस्याभीष्टा । जीवब्रह्मणोः ऐक्ये यदज्ञानावरणं तस्यैव निवृत्तिसम्पादनं मुक्तिः इति । यद्यपि इयं मुक्तिः ज्ञानैकसाध्या इत्युक्तम्, तथापि कर्म भक्तिश्च तत्साधनान्तरं भवतः इति वेदान्तेष्ववगम्यते । निष्कामकर्मसम्पादनेन एव ज्ञानं प्राप्तुं शक्यते इति वर्णयति गीताचार्यः -

**काम्यानां कर्मणा न्यासं सन्यासं कवयो विदुः ।**

**सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ।।** (भ.गी. १८-२)

किञ्च **चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये** (वि.चू. ११) इति भगवत्पादवचनं ज्ञापयति यत् यद्यपि कर्मणा साक्षात् ब्रह्मावगमः न भवति तथापि परम्परया तु भवत्येव । कर्मणा चित्तशुद्धिः चित्तशुद्ध्या च ज्ञानावाप्तिः, ज्ञानाच्च मुक्तिः इति क्रममुक्तिः कर्मणा भवतीति आशयः ।

**बीजपदानि –** कर्म, नित्यकर्म, नैमित्तिककर्म, उपासनाकर्म, प्रायश्चित्तकर्म, काम्यकर्म, निषिद्धकर्म, मुक्तिः ।

**भूमिका -**

दुःखसन्तप्तमानवस्य लक्ष्यप्राप्तये धारात्रयं शास्त्रेषु उपदिष्टं वर्तते । कर्मधारा, भक्तिधारा, ज्ञानधारा चेति। एकैकस्यापि धारायाः महत्त्वं वेदान्तदर्शने स्वतन्त्ररूपेण प्रतिपादितम् । वेदान्तसिद्धान्तानुसारेण ज्ञानं

यद्यपि परमपुरुषार्थस्य कृते साधनं, तथापि भक्तिः कर्म च तत्र सहकारिणौ इति । ज्ञानद्वारा साक्षात्परमपुरुषार्थप्राप्तिः उत्तमानां भवति, भक्तिद्वारा परमात्मपदप्राप्तिः मध्यमानां भवति, कर्मद्वारा पुरुषार्थस्य प्राप्तिः अधमानां भवति इति व्यवस्था ।

सृष्टौ उत्पन्नः सर्वोऽपि मानवः किमपि कुवन्नेव जीवति, कर्मानुष्ठानं विना तत्र जीवनं कष्टसाध्यम् । अत एव उक्तं श्रुतौ -

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।**

**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।**[१]

अस्य मन्त्रस्य अयमर्थः अस्मिन् संसारे यः शतवर्षात्मकमायुःपर्यन्तं जीवितुमिच्छति सः कर्माणि कुवन्नेव जीवेदिति । एतस्मात् इदं स्पष्टं यत् मानवजीवने यावती ज्ञानस्यापेक्षा यावत्येव भक्तेः अपेक्षा तावत्येव अपेक्षा कर्मणः इति । श्रीमद्भगवद्गीतायां स्वयं भगवान् श्रीकृष्णः कर्मतत्परं जीवनं श्रेयस्करमिति, कर्मणा ससिंद्धिः लभ्यते इति उपदिदेश । तद्यथा -

**कर्मणैव हि ससिंद्धिमास्थिता जनकादयः ।**[२]

**न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।**[३]

**न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।**[४]

एवं च मुक्तये कर्म यद्यपि साक्षात् न साधनं परम्परया साधनं तु भवत्येव । पुनश्च कर्म प्रत्येकमपि जीवने व्यक्तित्वविकासाय सामाजिकप्रतिष्ठायै च साधनं भवति । तदेव कर्म यदा निष्कामभावनया अनुष्ठीयते तदा तत् परलोकयात्रानिर्वाहकं भवति । निष्कामकर्म एव ज्ञानरूपेण परिणतं भवति । अतः निष्कामकर्म परमपुरुषार्थस्य साक्षात्साधनमिति अङ्गीकर्तुं शक्यते ।

संसारे उत्पन्नस्य सर्वस्यापि मानवस्य कृते कर्म अपेक्षत एव । अतः कश्चिदपि लोके अकर्मकृन्नास्तीति गीताचार्येण स्पष्टमुक्तम् -

**न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।**

**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ।।**[५]

अतः तत् सामर्थ्यबलेन मानवः कर्म अनुतिष्ठति । जन्म पुनर्जन्म वा प्रत्यपि कर्म एव हेतुर्भवति । अतः तत्र भगवती श्रुतिः कथयति -

**रमणीयचरणाः रमणीयां योनिमापद्यन्ते कपूयचरणाः कपूयां योनिम् । पुण्यकर्मानुष्ठितस्य जनस्य उत्तमा गतिर्भवति सहैव रमणीयां योनिं च प्राप्नोति ।**[६] तद्विपरीतस्य तु अधमा गतिर्जायते निन्दितं जन्म च प्राप्नोति ।

पुण्येन देवलोकः पापेन नरकः उभाभ्यां मनुष्यलोकः इति जीवमानस्य पुरुषस्य मरणोपरान्तं फलनिर्णयं कर्म एव करोति। अत उक्तम् -

**पुण्यो वै पुण्येन पापः कर्मणा भवति पापः पापेनेति उभाभ्यां मनुष्यलोक इति।**[७]

अतः कर्म सर्वस्यापि जीवने अपेक्षत एव। कर्मणः अनुष्ठानं विविधप्रयोजनमुद्दिश्य क्रियते लोके। अतः प्रयोजननिष्ठं कर्म सकामकर्म भवति। तद्विपरीतं तु निष्काम इति भावः। पुनश्च कर्म विविधप्रकारकमस्ति। नित्यकर्म, नैमित्तिककर्म, उपासनाकर्म, प्रायश्चित्तकर्म, काम्यकर्म, निषिद्धकर्म, अनुष्ठेयम्, अननुष्ठेयम् इत्यादीनि। एतेषां कर्मणाम् अनुष्ठाता कश्चिद्बुवेदेव। अतः ब्रह्मतत्त्वबुभुत्सून् उद्दिश्य उक्तं - ब्रह्मज्ञाने स एव अधिकारी यस्यान्तःकरणं प्रक्षालितं शुद्धं च भवेदिति। कर्मवादे कानिचित् कर्माणि फलोद्देश्येन विधीयमानानि भवन्ति। तान्येव काम्यकर्माणि भवन्ति। तदुक्तं विद्वन्मनोरञ्जनीकारेण -

**फलोद्देश्येन विधीयमानानि कर्माणि काम्यानि।**[८]

तस्योदाहरणं स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि। तदुक्तं सदानन्दयतिना -

